RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
अर्थेष्वलभ्येष्वकृतप्रयत्नं
कृतादरं नित्यमुपायवत्सु।
जितेन्द्रियं नानुतपन्ति रोगास्-
तत्कालयुक्तं यदि नास्ति दैवम्॥
अष्टांग;संग्रह;सूत्र

मनसा कर्मणा वाचा
परस्वादानहेतुतः।
प्रपतन्ति नराः सम्यग्
लोभोपहतचेतसः॥
(देवीभागवत - 3/16/49)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
सुलभाः पुरुषाः राजन् सततं
प्रियवादिनः।
अप्रियस्य च
पथ्यस्य वक्ता श्रोता च दुर्लभः॥
(वाल्मीकिरामायण,3/37/2)

''कर्मणैव हि
संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि
संपश्यन्कर्तुमर्हसि॥''

卐 वर्षम्-१४ 卐 अंकः-१९ (३३१) नवदेहली 卐 १ अप्रैलमासः २०२५तः १५ अप्रैलमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

### पतञ्जलिविश्वविद्यालये चतुर्दिवसीयस्य अखिलभारतीयशास्त्रोत्सवस्य भव्यम् उद्घाटनम्

## आध्यात्मिकता, विज्ञानं, संस्कृतिश्च-इत्येभिः सहितायाः संस्कृतभाषायाः त्रिवेणीसंगमः-आचार्यबालकृष्णः

हरिद्वारम् (धीरजमैठाणी)। केंद्रीयसंस्कृतविश्वविद्यालयेन नवदिल्ली, पतञ्जलिविश्वविद्यालयेन च हरिद्वारे संयुक्ततया आयोजितस्य द्विषष्टितमस्य अखिलभारतीयशास्त्रस्पर्धायाः उद्घाटनं भव्यरूपेण सम्पादितम्।



उद्घाटनसत्रे पतञ्जलिविश्वविद्यालयस्य कुलपतिः आचार्यबालकृष्णः मुख्यातिथिरूपेण सभां सम्बोधितवान्। सः उक्तवान् यत् 'संस्कृतं केवलं प्राचीनभाषा न, अपितु आध्यात्मिकता, विज्ञानं, संस्कृतिश्च अस्यां संलिन्ने स्तः। एषा अस्माकं मूलभाषा अस्ति, या सत्यं प्रामाणिकतां च आधारतः प्रतिष्ठिता। एवं प्रकारस्य आयोजनेन अस्माकं एषा अमूल्यधरोहरूपा संस्कृतभाषा अगामिन्यः पीढीषु सफलतया सम्प्रेष्यते।'

सः पुनरपि अवदत् यत् 'यदि अस्माकं पश्चाद्भावे शास्त्राणि, संस्कृतभाषा, शेषभागःद्वितीयेपुटे




## संस्कृतशास्त्राभ्यां भारतस्य उत्थानम्-मुख्यमन्त्री पुष्करधामी

हरिद्वार। हरिद्वारे मार्चमासस्य २१तमदिनाङ्के पतञ्जलिविश्वविद्यालये आयोजिता ६२वी अखिलभारतीयशास्त्रोत्सवस्पर्धायाः समापनसमारोहे उत्तराखण्डस्य मुख्यमन्त्री श्री पुष्करसिंहधामी अवदत् यत् अस्माकं शास्त्राणि केवलं ग्रन्थाः न, अपितु संपूर्णसृष्टेः रहस्यानां ज्ञापनाय माध्यमानि। भारतीयशास्त्राणां



ग्रन्थेषु तादृशाः अद्भुताः सूत्राः सन्ति, ये अद्यतनज्ञानविज्ञानयोः परिदृश्यन्ते।

तेन उक्तं यत् वेदशास्त्राणि व्यवहाररूपेण प्रस्तूयमानानि भवन्तु, येन युवा पीढीषु तेषां प्रति आस्था रुचिश्च संवर्ध्येत। सः अपि अवदत् यत् उत्तराखण्डराज्यस्य सरकारः सनातनधर्मं भारतीयज्ञानपरम्परां च प्रोत्साहयितुं विशेषं प्रयासं करोति, येन प्राचीनभारतीयज्ञानविज्ञानं विश्वस्तरे प्रतिष्ठापयितुं शक्यते।

अस्मिन अवसर एव पतञ्जलिविश्वविद्यालयस्य कुलाधिपतिः योगऋषिः स्वामीरामदेवः अवदत् यत् संस्कृतं केवलं भाषा न, अपितु विश्वस्य सर्वेषु क्षेत्रेषु नेतृत्वं प्रदातुं समर्था। सः उक्तवान् यत् अखिलभारतीयशास्त्रोत्सवः संस्कृतसंस्कृतेः च सङ्गमः अस्ति।

कार्यक्रमे पतञ्जलिविश्वविद्यालयस्य कुलपतिः आचार्यबालकृष्णः संस्कृतं तीर्थरूपेण तथा संस्कृति गौरवरूपेण निरूप्य, जीवनस्य उन्नतिकारिणीं भारतीयज्ञानपरम्परां प्रकटितवान्।

शेषभागःद्वितीयेपुटे

## भारतीयज्ञानपरम्परा-राष्ट्रियशिक्षानीतिविषये भव्यत्रिदिवसीयसङ्गोष्ठी आयोजिता

-डॉ विजयगुप्ता

नवदेहली। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये, नवदिल्लीनगरे १८ तः २० मार्चपर्यन्तं त्रिदिवसीया राष्ट्रियगोष्ठी आयोजिता। भारतीयज्ञानपरम्परायां निहितं वैज्ञानिकं, राजनैतिकं, सामाजिकं, नैतिकम् इत्यादीनि तत्त्वानि तथा च राष्ट्रियशिक्षानीतेः विशेषतां प्रकाशयितुम् एषा संगोष्ठी समायोजिता आसीत। सङ्गोष्ठ्याः उद्घाटनसत्रे मुख्यातिथित्वेन समागताः राज्यसभायाः पूर्वसांसदाः प्रो.राकेशसिन्हामहाभागाः



भारतीयज्ञानपरम्परायाः विशेषतां प्रकाशयन् अवदत् यत् यस्मिन् काले अन्याः सभ्यताः उद्भवन्ति स्म, तस्मिन् काले भारते अनेके वैज्ञानिकग्रन्थाः लिखिताः आसन्। विज्ञानस्य सर्वतत्त्वानि समाहितं वेदं गुरुकुलपरम्पराद्वारा निरन्तरम् अध्याप्यते स्म। अद्यत्वे बहवः प्रणाल्याः स्वास्थ्यरक्षणाय प्रयतन्ते किन्तु प्राचीनकाले आयुर्वेदः योगश्च स्वास्थ्यसंरक्षणस्य मुख्यः स्रोतः आसीत्। वस्तुतः विज्ञानस्य सर्वाणि तत्त्वानि भारतीयज्ञानपरम्परायां निहिताः सन्ति।

विशिष्टातिथित्वेन सम्प्राप्ताः अन्तर्राष्ट्रीयसंस्कृताध्ययनसङ्घस्य अध्यक्षाः दिल्लीविश्वविद्यालयस्य संस्कृतविभागीयभूतपूर्वाचार्याः प्रो.दीप्तित्रिपाठिमहोदयाः भारतीयज्ञानपरम्परायाः राष्ट्रियशिक्षानीतेः च अन्तःसम्बन्ध विषये विशिष्टं व्याख्यानं प्रदत्तवन्तः। उद्घाटनसत्रस्य अध्यक्षाः विश्वविद्यालयस्य कुलपतयश्च प्रो. मुरलीमनोहरपाठकवर्यैः वेद-उपनिषद्-पुराण-दर्शनादिविविधस्रोतानां सन्दर्भं दत्त्वा भारतीय-ज्ञान-परम्परायाः

शेषभागःतृतीयेपुटे

# उत्तराखण्डविद्वत्सभया ( पंजी० ) वास्तुविशेषाङ्कस्य भव्यं विमोचनं विहितम्

देहरादूनम्, (धीरजमैठाणी) २७ मार्च २०२५-उत्तराखण्डविद्वत्सभायाः (पंजी०) तत्वावधानेन विशेषः कार्यक्रमः मनोभावने पथियाश्रये, गुरु मार्गे, पटेलनगरे, देहरादूने अपराह्णे परमपूज्य संरक्षकमण्डलस्य विशेषे सान्निध्ये सम्पन्नः, आचार्यः श्रीविजेन्द्रप्रसादममगाई अध्यक्षतां वहन् समागतमान्यजनेभ्यो धन्यवादं ज्ञापयन् वास्तुविशेषाङ्कस्य विमोचनस्य शुभाशंसनं व्यक्तीकृतवान्।




अमृतकुम्भवास्तुविशेषाङ्कस्मारिकायाः विमोचनम्-संवत् २०८२ मध्ये प्रकाशितायाः अस्याः विशेषस्मारिकायाः केन्द्रविषयं वास्तुविज्ञानं आध्यात्मिकमूल्यानि च वर्तते।

पूर्वपदाधिकारिणां, विज्ञापनदातृणां, सम्पादकस्य आचार्यराजेशामोलीमहाभागस्य च सम्माननसमारोहः अत्र सविशेषं समायोजितम्। सभायाः पत्रिकायां विज्ञापनं दत्तवद्भ्यः गणमान्यजनेभ्योऽत्र सश्रद्धं सम्माननं कृतम्।

दीपप्रज्वलनेन १०८श्री महन्तकृष्णगिरिमहाभागेन, उत्तराखण्डविद्वत्सभायाः संरक्षकेण शुभारंभः कृतः। तेन ब्रह्मसमाजे निवेदनं कृतं यत् तिथिनिर्णये विवेकपूर्वकं निर्णयं दत्त्वा भ्रान्तीनां निराकरणं कृत्वा समाजस्य मार्गदर्शनं कुर्वन्तु इति।

समस्तविद्वज्जनैः स्वस्तिवाचनपूर्वकं कार्यक्रमस्य शुभारम्भः कृतः। विज्ञापनदातृभ्यः अथ च पूर्वपदाधिकारिभ्यः प्रशस्तिपत्रं अंगवस्त्रं च प्रदाय सम्माननं विहितम्। पूज्यः धर्माधिकारी आचार्यः श्रीराधाकृष्णथपलियालः (बी.के.टी.सी.) अस्य गरिममयस्य कार्यक्रमस्य मुख्यातिथित्वेन सभायै बद्रीनाथकेदारनाथमन्दिरसमितौ समावेशनस्य आश्वासनं दत्तवान्।

कार्यक्रमस्य सफलसंयोजने श्रीउमेशमिनोचामहोदयस्य (मनोभावनमन्दिरस्य) विशेषसहयोगः प्राप्तः। सम्पादकः राजेन्द्रामोलीमहोदयः सम्पादनसंबद्धानुभवान् व्यक्तीकृत्य वास्तुशास्त्रस्य वैशिष्ट्यम् अवर्णयत्।

मञ्चसञ्चालनं महासचिवः दिनेश प्रसाद भट्टः सकुशलम् अकरोत्।

अखिलभारतीयब्राह्मणमहासभायाः उत्तराखण्डशाखायाः अध्यक्षः मनमोहनशर्मा, शशीशर्मा, महेशकौशिक, ललितशर्मा, कल्याणचक्रवर्ती, नेपालीब्राह्मणमहासभायाः अध्यक्षः रामप्रसादोपाध्यायः, उपाध्यक्षः थानेश्वरउपाध्यायः, महासचिवः पुरुषोत्तमगौतमः, संरक्षक: पवनशर्मा, डॉ. रामभूषणबिजल्वाणः, रामलखनगैरोला, महाराजः श्रीरविगिरिमहाभागः, भरतरामतिवारी च इत्येभिः सहितः उत्तराखण्डविद्वत्सभायाः समस्तपदाधिकारिगणः कार्यकारिणीसदस्यदलं अस्मिन् महत्वपूर्णकार्यक्रमे सहभागम् अकुरुताम्।

प्रथमपुटस्य शेषभागः

## आध्यात्मिकता, विज्ञानं, संस्कृतिश्च....

संस्कृतिश्च न स्यात्, तर्हि अस्माकं अस्तित्वं संकटे स्यात्। भारतीयइतिहासः एव वास्तविकरूपेण विश्वस्य इतिहासः अस्ति, अद्य पुनः अस्माकं शास्त्रीयपरम्परया ज्ञानविज्ञानाभ्यां च वैश्विकमञ्चे प्रतिष्ठा सम्पाद्यते।'

अत्र केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडी अध्यक्षीयोद्बोधनं दत्वा उक्तवान् यत् 'संस्कृतं केवलं सम्प्रेषणस्य साधनं न, अपितु भारतीयसंस्कृतेः आत्मा अस्ति। एषा अखिलभारतीयशास्त्रीयस्पर्धा संस्कृतभाषायाः संरक्षणाय प्रचारप्रसाराय च महत्वपूर्णमञ्चं ददाति। अस्मिन्स्पर्धायां छात्राः वेदवाङ्मये, दर्शनशास्त्रे, व्याकरणे, न्याये, ज्योतिषे, साहित्ये, संगीते च आत्मनः ज्ञानस्य प्रदर्शनं कर्तुं शक्नुवन्ति, अपि च अन्येभ्यः शिक्षन्ते संस्कृतस्य गूढतत्त्वेषु च निपुणतां सम्पादयन्ति।'

तेन सह महर्षिपाणिनिसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. सी. जी. विजयकुमार अपि उक्तवान् यत् 'परिचयः, संस्कृतिः, आर्थिकमूल्यः, ज्ञानं च - एते सर्वे भारतीयज्ञानपरम्परया सम्भवाः।'

अत्र भारतीयशिक्षाबोर्डस्य कार्यकारीअध्यक्षः डॉ. एन. पी. सिंह, संगीतनाटकअकादम्याः अध्यक्षा डॉ. संध्या पुरेचा च भारतीयज्ञानपरम्परायाः महत्वं संस्कृतभाषायाः गौरवश्च विशदं प्रकटितवन्तौ।

उद्घाटनसमये वाक्यार्थपरिचर्चा अपि आयोजिता, यत्र 'जनिकृतुप्रकृतिः' इति सूत्रस्य विषये विविध शास्त्रेषु विमर्शः सम्पन्नः। अद्वैतवेदान्तस्य, पाणिनीयसूत्राणां, तेषु लिखितभाष्येषु च प्रकृतिसूत्रस्य प्रयोगः, तस्य व्याख्या च विद्वद्भिः चर्चिता।

अत्र पतञ्जलिविश्वविद्यालयस्य कुलानुशासिका प्रो. साध्वी देवप्रिया, प्रतिकुलपतिः प्रो. मयंक कुमार अग्रवाल, दूरशिक्षानिदेशकः प्रो. सत्येन्द्रमित्तल, कुलसचिवः आलोककुमारसिंह, कुलानुशासकः स्वामी आर्षदेवः, तथा केंद्रीयसंस्कृतविश्वविद्यालयस्य शिक्षकाः, विद्यार्थीगणः, शोधार्थिनः, देशस्य विभिन्नप्रदेशेभ्यः आगताः विद्वांसः च उपस्थिताः। कार्यक्रमस्य संचालनं प्रो. पवन व्यासेन सम्पन्नम्।

प्रथमपुटस्य शेषभागः

## संस्कृतशास्त्राभ्यां भारतस्य....

समापनसमारोहे पूर्वमुख्यमन्त्री तथा केंद्रीयशिक्षामन्त्री डॉ. रमेश पोखरियाल 'निशंक' अवदत् यत् संस्कृतं न केवलं प्राचीनभाषा, अपितु विश्वे सर्वत्र प्रतिष्ठायाः सामर्थ्यं धारयति। संस्कृतस्य ज्ञानविज्ञानप्रौद्योगिकीक्षेत्रेषु महान् योगदानम् अस्ति।

कार्यक्रमे केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी अपि संस्कृतं, शास्त्राणि, भारतीयज्ञानपरम्परां च विषयीकृत्य मन्तव्यं कृतवान्।

अस्मिन् शास्त्रोत्सवे देशस्य ३० राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च आगतानां प्रतिभागिनां पुरस्कारे अपि वितृणाः। कार्यक्रमस्य संयोजनं डॉ. मधुकेश्वरभट्टः कृतवान्, तथा मंचसंचालनं डॉ. पवनव्यासः कृतवान्।

# सुवृष्टिहेतोः मासानां महत्त्वं योगदानं च

-डॉ. लक्ष्मीकान्तविमलः

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन नवदेहलीस्थितेन मार्चमासस्य ३१तमे दिनांके शनिवासरे सायंकाले ५-७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन 'कादम्बिनीः मासिकाध्यायविमर्शः' इति नाम्ना राष्ट्रिया संगोष्ठी आयोजिता आसीत्। पण्डितमधुसूदन-ओझामहोदयस्य कादम्बिनीग्रन्थस्य द्वितीयाध्यायस्य वैशाखमासत: आश्विनमासतः षट्मासिकविषयमधिकृत्य समागताना दैवज्ञानां व्याख्यानं सञ्जातम। षट्मासिकविषये ४३१ कारिकाः सन्ति।



तत्कारिकायाः सारभूतं तथ्यं विद्वद्भिः प्रतिपादितम्।

श्रीलाल-बहादुर-शास्त्रि-राष्ट्रीय-संस्कृत-विश्वविद्यालयस्य ज्योतिषविभागस्य आचार्यः प्रो. परमन्दभारद्वाजमहोदयः, कार्यक्रमस्य अध्यक्षः आसीत्। स्वकीये अध्यक्षीये उद्बोधने तैः प्रतिपादितं यत् कादम्बिनीनामके ग्रन्थे वैशाखमासे मेघनिर्माणस्य पूर्वकल्पनायाः नियमस्य विचारो वर्तते। तेषु विचारेषु अक्षयतृतीया प्रमुखा अस्ति। अक्षयतृतीयायाः विषयवर्णने शकुनपरीक्षा, अमत्रपरीक्षा, काकपरीक्षा, बिम्बपरीक्षा, धान्यपरीक्षा, लोष्ट-परीक्षा, नक्षत्रपरीक्षा, गर्भपरीक्षा, वायुपरीक्षा उग्रवातपरीक्षा च समाहिता अस्ति। बिम्बपरीक्षायां विषयः अनेन प्रकारेण विद्यते।

**अक्षयायां तृतीयायां पूरयेद् भाण्डमम्बुना ।**
**रविं विलोकयेन्मध्ये तत्स्वरूपं विमर्शयेत्।।**
**रक्ते सूर्ये विग्रहः स्यान्नीले पीते महारुजः।**
**श्वेते सुभिक्षं विज्ञेयं धूसरो दुःखमूषकाः।।**

कादम्बिनी, पृ.५५, कारिका २२८-२२९

अक्षयतृतीयायां तिथौ कस्मिंश्चित् पात्रे जलं पूरयित्वा तज्जले सूर्यस्य प्रतिबिम्बः परीक्षणीयः। तस्य प्रतिबिम्बस्य आधारेण वृष्टेः अनुमानं जायते। जले सूर्यस्य बिम्बः यदि रक्तवर्णात्मकः स्यात् तर्हि तस्य बिम्बस्य फलं युद्धं भवति। सूर्यस्य बिम्बः यदि नीलः पीतः च स्यात् तर्हि तस्य बिम्बस्य फलं व्याधिर्भवति। सूर्यस्य बिम्बः यदि श्वेतः स्यात् तर्हि तस्य बिम्बस्य फलं समुचितावृष्टिः अस्ति। जले सूर्यस्य बिम्बः यदि धूलिवर्णात्मकः स्यात् तर्हि तस्य बिम्बस्य फलं मूषकादिजन्यं दुःखम् अस्ति।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य, जयपुरपरिसरस्य ज्योतिषविभागस्य आचार्यः प्रो.विष्णुकुमारनिर्मलमहोदयो मुख्यवक्ता आसीत। सः स्वकीये सारगर्भिते वक्तव्ये कादम्बिनीग्रन्थस्य महत्त्वं निरूपयामास। स कथितवान् यत् अस्मिन् ग्रन्थे जेष्ठमासेन संबन्धिताः अनेके विषयाः सुगुम्फिताः सन्तिः। तेषु विषयेषु मासादिरोहिणी, पवनधारणा, प्रवर्षणमितिः, मासान्तरोहिणी प्रमुखा अस्ति। पवनधारणायां ग्रन्थकारः पं. ओझामहोदयो लिखति-

**चतस्रस्तिथयो वायुधारणा अष्टमीमुखाः।**
**ज्यैष्ठशुक्ले मृदु-स्निग्ध-स्थगिताभ्रोऽनिलः शुभः।।**
**स विद्युतः सपृषतः सपांशूत्करमारुताः।**
**सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः।।**

कादम्बिनी, पृ.६५, कारिका २८३-२८४

ज्येष्ठशुक्लस्य अष्टम्यां तिथितः एकादशीतिथिपर्यन्तं चतस्रः तिथयः वायुधारणं कुर्वन्ति। तस्मिन् वायौ मृदुस्वभावः, स्निग्धस्वभावः स्थगितस्वभावः विद्यते। अस्यां तिथौ यदि विद्युत् स्यात्, जलस्य किञ्चित् धारा पतेत्, धूलियुक्तः वायुः प्रचलति, चन्द्रमसि मेघः स्यात्, एतानि लक्षणानि वृष्ट्यै मेघगर्भधारणाय शुभानि भवन्ति।

उज्जैननगरस्य महर्षिपाणिनिसंस्कृतएवंवैदिकविश्वविद्यालयस्य ज्योतिषविभागस्य सहायकाचार्यः डॉ. रूपेशकुमारमिश्रमहोदयः वक्तृरूपेण विषयम् उद्घाटितवान्। सः आषाढमासस्य विषयवस्तु अधिकृत्य विचारं कृतवान्। कादम्बिनीग्रन्थे आषाढमासविषये स्वातियोगः, आषाढीपरीक्षा रोहिणीयोगश्च विद्यतेतराम्। आषाढी परीक्षाविषये ग्रन्थकारः लिखति-

**गर्भाः पुष्टिकराः सर्वे सुयोगा विलयं गताः।**
**आषाढ्यां तु विनष्टायां सर्वमेवाशुभं भवेत्।।**
**गर्भनाशकराः सर्वे कुयोगा विलयं गताः।**
**यद्याषाढी शुभा जाता तदा सर्वं शुभं भवेत्।।**

कादम्बिनी, पृ.८५, कारिका ४१७-४१८

आषाढ-शुक्ल-पूर्णिमायां तिथौ निर्धारितस्य मेघगर्भधारणलक्षणस्य विनष्टः स्यात् तर्हि मेघस्य गर्भधारणं न भवति। यदि अस्यां पूर्णिमायां तिथौ योगः सम्यक् स्यात् तर्हि मेघगर्भधारणस्य कुयोगः अपि सुयोगो भवति। अत एव आषाढपरीक्षा अत्यधिका महत्वपूर्णा अस्ति।

देवप्रयागस्थितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य, रघुनाथकीर्तिपरिसरस्य ज्योतिषविभागस्य सहायकाचार्यः डॉ. ब्रह्मानन्दमिश्रः वक्तृरूपेण विषयस्य उद्घाटनं कृतवान्। वृष्ट्यै श्रावणमासस्य विशिष्टं महत्त्वम् अस्ति। श्रावणमासस्य विषये ग्रन्थकारः कथयति यत् सूर्यस्य स्थित्या वृष्टेः योगः सञ्जायते।


**श्रावणे शुक्लपक्षे तु सिंहसंक्रान्तिसम्भवः।**
**समुद्रे पूर्णवृष्टिः स्यादन्यदेशे तु कुत्रचित्।।**

शेषभागःचतुर्थपुटे

# डॉ. कृतियादवः डॉ. भीमराव अम्बेडकरस्य जीवनवृत्तेः विषये संस्कृतभाषायां प्रथमं शोधं कृतवती

(वार्ताहरः- प्रवेशकुमारशुक्लः आगरा)

दीक्षांतसमारोहः २०२५ तमस्य वर्षस्य मार्चमासस्य २५ दिनाङ्के उत्तरप्रदेशस्य आगरा-नगरस्य ष्दयालबाग एजुकेशनल इंस्टीट्यूटष् इत्यस्मिन् सम्पन्नः। यत्र विभिन्नताः शोधकर्तारः डॉ .उपाधिं विद्यावाचस्पति-उपाधिं च प्राप्तवन्तः। तेषु कलासंकायस्य संस्कृतविभागात् कृतियादवः शोध प्रबन्धं सम्पन्नं कृतवती स्वस्य शोधमार्गदर्शिकायाः डॉ. निशिथगौरमहोदयायाः मार्गदर्शनेन विद्यावारिधि उपाधिं प्राप्तवती। अयं प्रबन्धः आगरा-नगरस्य दयालबाग-शैक्षिक-संस्थायाः प्रथमः शोध-प्रबन्धः संस्कृतभाषायां संस्कृतविषये लिखितः अस्ति तथा च सार्धद्विवर्षे अयं प्रबन्धः सम्पन्नः। अस्मिन् शोध कार्ये भीमराव-अम्बेडकर-चरित्र-आधारित-संस्कृत-काव्यानां विषये कार्यं कृतम् अस्ति। अयं प्रबन्धः भीमराव अम्बेडकरविषये संस्कृतभाषायां कृतः प्रथमः शोधप्रबन्धः इति अपि मन्यते।



# अखिलभारतीयशोधसम्मेलनायोजनम्

## संस्कृतभाषायाः प्रत्येकं वाक्ये जीवनकौशलं वर्तते : डॉ. तिवारी

हरिद्वारम्। हरिद्वारस्थश्री भगवानदास- आदर्शसंस्कृतमहाविद्यालये आयोजिते अखिलभारतीयसंस्कृतशोधनसम्मेलने मुख्यवक्ता डॉ. अरविन्दतिवारी संस्कृतभाषायाः प्रत्येकं वाक्ये जीवनकौशलं वर्तते इति उक्तवान्। महाभारते वेदव्यास उक्तवान् यत् अस्माभिः अन्यैः सह यथा अनुचितो व्यवहारः न कर्तव्यः। यः अस्मभ्यं न रोचते। श्रीमद्भगवद्गीता अस्मान् निरन्तरं सत्कर्म कर्तुं उपदेशं करोति। संस्कृते जीवनकौशलविषये चर्चां




कुर्वती मनुस्मृतिः कथयति यत् यः स्वपितृगुरूणाम् आदरं करोति तस्य वयः, ज्ञानं, यशः, बलं च वर्धते।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सहकारेण आयोजितस्य सम्मेलनस्य उद्घाटने महाकविः पद्मश्रीप्रो अभिराज राजेन्द्रमिश्रः कथितवान् यत् महाभारतस्य शांतिपर्व जीवनकौशलस्य शिक्षां ददाति। सः अवदत् यत् सौभाग्यम् अस्ति यत् वयं तस्य अक्षरस्य उपयोगं कर्तुं समर्थाः स्मः।

भगवन्दास- आदर्शसंस्कृतमहाविद्यालये भारतीयसंस्कृतसंशोधनसम्मेलने असौ उक्तवान्, वन्देमातरम् इति वाक्यं जीवनकौशलस्य बृहत्तमं उदाहरणम् अस्ति किन्तु वयं यत्र वेदः, दर्शनम्, उपनिषद् इत्यादीनां उत्पत्तिः अभवत् तत्रैव समुत्पन्नाः। एतेषां वेदानां ज्ञानात् भारतं विश्वाध्यापकम् । भारतस्य ऋषयः एव जगति जीवनकौशलं शिक्षयन्ति। भारतसर्वकारस्य वित्तमन्त्रालयस्य उपमहानिदेशिका हेमाजयसवालः अवदत् यत् संस्कृतं ज्ञानस्य एकः अद्वितीयः भण्डारः अस्ति। संस्कृतभाषा न केवलं प्राचीनग्रन्थानां मन्त्रसङ्ग्रहः । अस्माकं ऋषिभिः दत्तः अमूल्यः न्यासो विद्यते। उत्तराखण्डसंस्कृतविश्वविद्यालयस्य रजिस्ट्रारः डॉ. गिरीशकुमार अवस्थी उक्तवान् यत् मानवजीवनस्य उत्थानार्थं सर्वाणि पद्धतयः उपनिषदेषु प्राप्यन्ते। अवसरे अस्मिन् महाविद्यालयस्य प्राचार्यचरः आचार्यभोलाझा, प्राचार्यः ब्रजेन्द्रसिंहदेवः, आचार्यरवीन्द्रकुमारः,डॉ. निरंजन-मिश्रः डॉ. मंजू पटेल,: डॉ. आलोककुमारसेमवालश्चान्ये संस्कृतानुरागिण उपस्थिता आसन्।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपाल-परिसरे द्विदिवसीयराष्ट्रीयसङ्गोष्ठ्याः समापनसमारोहः समाचरितः

(वार्ताहरः-प्रवेशकुमारशुक्लः, भोपालम्)

केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपाल-परिसरे

द्विवसीयराष्ट्रीयसङ्गोष्ठ्याः २८-२९ मार्च २०२५ दिनाङ्के आयोजनमभवत् ।

सङ्गोष्ठ्याः विषयः 'भारतीय परम्पराओं में अनुसन्धान प्रक्रिया' इति आसीत्। वैदिकमङ्गलाचरणेन वाग्देवी समर्चनेन च समापनसमारोहस्यारम्भः अभवत्। प्रो० श्रीनिवासबरखेडी विश्वविद्यालयस्य




यशस्वीकुलपतीनां संरक्षणे निर्विघ्नतया इयं व्याख्यानमाला अनवरतरूपेण प्रचलिता। भोपालपरिसरस्य कुशलनिदेशकाः- प्रो० रमाकान्तपाण्डेयाः आध्यक्षीयपदमलङ्कृताः ते उक्तवन्तः 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' सर्वत्र संस्कृतमेव विद्यते। विश्वविद्यालयस्य सह-निर्देशकाः राष्ट्रपतिसम्मानिताः प्रो० निलाभतिवारिवर्यैः प्रोक्तं यत् ज्ञानं मनुष्यस्य तृतीयनेत्रं विद्यते । अतः स्वाध्यायम् अवश्यमेव कर्तव्यम् तैत्तरीयोपनिषदि अपि वतर्ते 'स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्' । कार्यक्रमस्यास्य संयोजकाः प्रो० सोमनाथसाहुवर्याः आगतानामतिथिनां वाक्पुष्पैः स्वागतभाषणैः च स्वागतं कृत्वा कार्यक्रमस्य प्रतिवेदनं प्रस्तुतवन्तः। अस्यां राष्ट्रीयसङ्गोसष्ठ्यामष्टसप्ततिः जनाः पत्रवाचनं कृतवन्तः। मुख्यातिथित्वेन समागताः सांचीबौध्दभारतीयध्ययनविश्वविद्यालयस्य कुलपतयः प्रो० वैद्यनाथलाभवर्याः अवोचत् यत् अनुसन्धानं लोककल्याणाय भवेत् न तु दिग्भ्रमाय। सारस्वतातिथिरूपेण संस्कृतसंवर्धनप्रतिष्ठान नवदेहली शैक्षिकनिदेशकाः प्रो० चांदकिरणसलूजावर्याः 'भारतीय ज्ञान प्रणाली में अनुसन्धान पद्धति' इति विषये सर्वान् संस्कृतलोलुपान् प्रचोदितवन्तः। ते अवदन् यत् गीतायामस्ति 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति, अनुसन्धानस्य वास्तविकं स्वरूपं भवति यत् सर्वेषां वेदना स्वकीया वेदना। श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य छात्रकल्याणसंकायाध्यक्षाः प्रो० शिवशंकरमिश्रवर्यैः 'शास्त्रीय शोध परम्परा' इति विषये उक्तवन्तः प्राचीनकालादेव अनुसंधानस्य सर्वाः प्रक्रियाः अस्माकं संस्कृतशास्त्रे एव विद्यन्ते। 'न्यायशास्त्र की दृष्टि में शोध पद्धति' इति विषये इन्दिरागांधीराष्ट्रीयमुक्तविश्वविद्यालयस्य शिक्षाविभागस्याचार्याः प्रो० अरविन्दझावर्याः पाश्चात्याधुनिकानुसन्धानं तुलनात्मकरूपेण प्रबोधिताः । आयोजकाः डा० राकेशकुमारवर्मा, डा० मंजूसिंहः, डा० शीतांशुत्रिपाठी, डा० आशुतोषतिवारी स्वदायित्वं सुष्ठुरूपेण निर्व्यूढवन्तः। डॉ नरसिंहलुमहोदयाः सभायाः संचालनमकुर्वन्। अन्ते प्रो० कैलासचन्द्रदासवर्याः धन्यतावाकं प्रदत्तवन्तः। राष्ट्रगानेन कार्यक्रमस्य समाप्तिः अभवत् इति।

# रविवासरे केन्द्रीयसंस्कृतविश्वविद्यालयस्याधिकृतं राष्ट्रियं श्रीभोजराजपञ्चाङ्गस्य विमोचनमभवत्

(वार्ताहरः- प्रवेशकुमारशुक्लः, भोपालम्)

(२०८२ नवसंवत्सरस्य हार्दिक्याः मङ्गगलशुभकामनाः )

नवसंवत्सरमहोत्सवे केन्द्रीयसंस्कृतविश्वविद्यालयस्याधिकृतं राष्ट्रिय श्रीभोजराजपञ्चाङ्गस्य लोकार्पणं सम्भूतम्। विश्वविद्यालयस्य श्रेष्ठः कुलपतयः प्रो० श्रीनिवास वरखेड़ीवर्यैः उक्तं भगवतो वेदस्य नेत्ररूपेण प्रतिष्ठितं ज्योतिषशास्त्रं व्रतपर्वादिपरिज्ञानसोपानम। ग्रहगतिमाध्यमेनैव व्रतपर्वादिपरिज्ञानं प्राप्य तत्तत्कर्मप्रवृत्तो



भवति मानवः। फलानि ग्रहचारेण सूचयन्ति मनीषिणः। फलसञ्चारस्य फलव्याप्तेर्वा निश्चितनियमे सत्येव ग्रहचारेण फलाभिव्यक्तिर्भवितुमर्हति। अर्थात् महर्षयो विश्वस्य समग्रं तत्त्वमवगम्यैव सिद्धान्तान् स्थिरीकृतवन्तः। व्रतपर्वनिदर्शकस्य पञ्चाङ्गस्यापि प्रवृत्तेराधारः फलसञ्चयः फलप्राप्तिः फलोत्पत्तिश्च भवति। अतः परम्पराया मार्गदर्शकरूपेण दृक्सूचीबद्ध पञ्चाङ्ग प्रवर्तते। लोकाः समस्ताः सुखिनो भवन्त्विति कामये। भोपालपरिसरनिदेशकाः पूज्याः प्रो. रमाकान्तपाण्डेयवर्याः कथितं भारतीया संस्कृतिव्रतपर्वतिथिप्रधाना वर्तते। अस्यां जनसामान्यमपि स्वीयं कार्यं सुमुहूर्त एव सम्पादयति। लोके यद् यद् अस्माभिराचर्यते तत्सर्वं समर्पणबुद्ध्यैव। "इदं राष्ट्राय, इदं न मम" इयमेव चेतना भारतीयानां मनसि सर्वदा जागर्त्ति। एतद्बुद्ध्यैव संसारे क्रियमाणं कार्यं पारमार्थिकी सिद्धिं वितरति। ष्मृत्योर्मा अमृतं गमयष इति धिया संसारसरणौ सरन्तो भारतीया लोकं लौकिकं कर्म च पारमार्थिकलाभोपायत्वेन स्वीकुर्वन्ति । अस्यां स्थितौ ते सर्वाण्यपि कार्याणि शुभमुहूर्त सम्पादयन्तीति पञ्चाङ्ग तेषां कृते नितरामपरिहार्यम्।

सह-निर्देशकाः प्रो० नीलाभतिवारीमहाशयैः भणितं 'पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेतिति'। मुख्यातिथित्वेन तिरुपतिस्थ राष्ट्रियसंस्कृतविश्वविद्यालयस्य ज्योतिषविभागस्याध्यक्षचरः प्रो. श्रीपादभट्टः।सारस्वतातिथिरूपेण लखनऊपरिसरस्य निदेशकाः प्रो. सर्वनारायणझावर्याः उपस्थिताः।

विशिष्टातिथित्वेन कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्याचार्याः प्रो. कृष्णकुमारपाण्डेयः समागताः। कार्यक्रमौयं प्रो. भारतभूषणमिश्रवर्याणां संयोजकत्वेन सम्पन्नः। प्रातः पञ्चवादने परिसरीयाचार्याः छात्राश्च शंखध्वनिवेदोद्घोषैः नवसंवत्सरस्योत्वः समाचरितवन्तः। प्रो. सुबोधशर्माः, प्रो. अशोककुमारकछवाहः, डा. प्रदीपदीक्षितः, डा. राकेशवर्मा, डा. जीतेन्द्रतिवारी, डा.एस कृष्णा डा. वरुणसौरभपोखरियालः, डा. गोकुलतिवारी डा. महिमातिवारी श्री अंकुरपाण्डेय प्रभृतयाः विद्वांसः उपस्थिताः आसन्।

प्रथमपुटस्य शेषभागः **भारतीयज्ञानपरम्परा-राष्ट्रियशिक्षानीतिविषये...**

प्राचीन-भारतीय-विज्ञानस्य सारं व्याख्यातम्। अद्य समस्तं विश्वं भारतस्य समक्षं नमति, एतत्कारणमसि अस्माकं संस्कृतेः विलक्षणता विशिष्टता च। भारतीयज्ञानपरम्परायां शिक्षायाः विज्ञानस्य च एतादृशाः बहवः तत्त्वानि सन्ति, येषु यदि आधुनिकदृष्ट्या संशोधनं क्रियते तर्हि अवश्यमेव मौलिकविषयान् प्रकाशं आनेतुं शक्यन्ते।

१८ मार्चतः २० मार्चपर्यन्तं विभिन्नेषु सत्रेषु प्रायः २०० प्रतिभागिनः भारतीयज्ञानपरम्परा-राष्ट्रियशिक्षानीतिविषये च विभिन्नसन्दर्भेषु स्वस्वविचारं प्रकटितवन्तः। कार्यक्रमस्य सम्पूर्तिसत्रे २० दिनांके केन्द्रीयसंस्कृतविश्वविद्यालयस्य सदाशिवपरिसरस्य पूर्वनिदेशकाः प्रो.खगेश्वरमिश्रवर्याः भारतीयज्ञानपरम्परायाः विभिन्नपक्षान् प्रस्तुतवन्तः। एनसीईआरटी इत्यस्य संस्थायाः निदेशकाः प्रो.दिनेशप्रसादसकलानीमहोदयाः मुख्यातिथिरूपेण भाषणं कुर्वन् भारतीयसंस्कृतेः चतुर्णाम् आश्रमाणां विषये विस्तृततया प्रकाशं निपतितवन्तः। एते प्राचीनभारतीयज्ञानस्य आधुनिकविज्ञानरूपेण परिवर्तनस्य कारणं व्याख्यातवन्तः। अद्य अस्माकं देशः राष्ट्रियशिक्षानीतौ भारतीयज्ञानपरम्परां प्रमुखतां दत्त्वा नूतनपाठ्यक्रमं ग्रन्थान् च निर्माति, एतत् भारतीयज्ञानपरम्परायाः पुनः जागरणम् अस्ति। सत्रस्यास्य अध्यक्षाः कुलपतयः प्रो.मुरलीमनोहरपाठकवर्याः सम्पूर्णस्य कार्यक्रमस्य प्रशंसाम् आयोजनसमितेश्च प्रोत्साहनं कृतवन्तः। अस्मिन् अवसरे कार्यक्रमस्य संयोजकः प्रो.देवीप्रसादत्रिपाठी, प्रो.शिवशंकरमिश्रः, प्रो.ए.एस.आरावमुदन्, प्रो.शीतलाप्रसादशुक्लः, प्रो.कल्पना जैन, प्रो.मीनू कश्यप, प्रो. प्रेमकुमारशर्मः प्रो.जयकान्तसिंहशर्मः, श्रीसन्तोषकुमारश्रीवास्तवः तथा चान्ये सर्वे प्राध्यापकाः शताधिकाः शोधविद्वांसः शोधपत्रप्रस्तोतारश्च समुपस्थिताः आसन्।

# इदं सामोदमुदीर्यते यदस्मदीयवैदिकगणस्य गुजरातगणस्य गणाध्यक्षाः

(वत्सदेशराजशर्मा)

आशुकवयः सुकवयः श्रीमन्तः सहदेवकुमारजोषीमहोदयाः श्रीमतां केन्द्रीयसंस्कृतविश्वविद्यालयस्य



कौलपत्यं वहतां श्रीनिवासवरखेडीमहाभागानां सादस्पत्ये श्रीमति पतञ्जलिविश्वविद्यालये सम्पन्नायां ६२ तमी अखिलभारतीयशास्त्रीयस्पर्द्धा ( दिनाङ्कः १८/०३/२०२५ तः २१/०२/२०२५ ) इत्येतस्यां निर्णायकत्वेनोपस्थाय योगगुरुरामदेवबाबामहागानां च करकमलाभ्यां सम्मानमधिगत्य वैदिकगणस्य गुजरातराज्यस्य च गौरवमपोपुष्यन्त । तान् वयं गणपक्षतः सादरमभिनानन्द्मः ।

# सम्पादकीयम्

सम्मानिताः सुजनाः! सादरं नमोनमः।

हिन्दूनां पञ्चाङ्गानुसारम् नववर्षं २०२५ मार्चु३० दिनाङ्के आरभ्यते। अस्य वर्षस्य नाम सिद्धार्थ संवत् अस्ति। नववर्षस्य आरम्भः रविवासरे भवति अतः संवत्सरस्य राजा मन्त्री च सूर्यः एव भविष्यतः। तथैव अन्न-धन-खनिज-धातूनां स्वामी बुधः, खाद्यपदार्थानां स्वामी मङ्गलः भविष्यति। पाञ्चाङ्गिक-विश्लेषणानुसारं चैत्रशुक्लप्रतिपदा रविवासरे २०२५ मार्चु३० दिनाङ्के शुभग्रहयोगे नवसंवत्सरस्य २०८२ आरम्भः भविष्यति। अस्मिन्नेव दिने सायं ६:१४ पर्यन्तं रेवती नक्षत्रं ततः अश्विनी नक्षत्रं भविष्यति। मीनलग्नं प्रातः ०६:२६ पर्यन्तं स्थित्वा ततः मेषलग्नस्य आरम्भः भविष्यति। अस्मिन् दिने मीनराशौ पञ्चग्रहाणां स्थित्या पञ्चग्रहीययोगः भविष्यति। मीनराशौ सूर्यः, बुधः, राहुः, शनिः, शुक्रः च स्थिताः भविष्यन्ति। केतुः कन्याराशौ, देवगुरुः बृहस्पतिः वृषराशौ, मङ्गलः मिथुनराशौ स्थितः भविष्यति। विक्रमसंवत् २०८२ चैत्रशुक्लप्रतिपदा हिन्दूनां नववर्षरूपेण प्रसिद्धः अस्ति। पञ्चाङ्गे द्वादशमासाः भवन्ति, प्रतिमासस्य आरम्भः कृष्णपक्षतः भवति। ब्रह्मपुराणे उल्लिखितं यत् ब्रह्मदेवेन अस्मिन्नेव तिथौ सृष्टेः निर्माणं कृतम्। संवत्सरस्य नाम-सिद्धार्थः, वाहनम्-अश्वः। एषः संवत्सरः ज्ञानिनां वैराग्यशीलानां च उत्तमः भविष्यति। धर्म-अध्यात्मे जनानां रुचिः वर्धिष्यते। बुधग्रहस्य प्रभावात् वर्षास्या स्थितिः संतोषजनका भविष्यति। चौमासिकानां धान्यानां स्वामी बुधः अस्ति अतः गोधूमः, धान्यम्, इक्षुः इत्यादीनां उत्पादनं वर्धिष्यते। हेमन्तकालस्य धान्यानां स्वामी चन्द्रमाः अस्ति अतः मुद्गः, प्रियंगुः, रक्ततिल (सर्षपः) च उत्तमं उत्पादनं प्राप्स्यन्ति।

नवसंवत्सरस्य निवासः वैश्यगृहे भवति अतः व्यापारस्य उत्तमवृद्धिः भविष्यति। अन्नं, भूमिः, गृहनिर्माणम्, शिक्षाः, सुवर्णम्, वाहनानि, तन्त्रज्ञानम् इत्यादिषु क्षेत्रेषु तीव्रगतिर्भविष्यति। सूर्यस्य राजत्वं मन्त्रित्वं च भवतः अतः वर्षे तापमानं सामान्यतः उच्चं भविष्यति। अधिकगर्मत्वात् अग्निकाण्डेन जन-धनयोः हानिः सम्भाव्यते। वृक्षेषु अल्पफलोत्पत्तिः भविष्यति।

२०८२ संवत्सरस्य आकाशीय मण्डले यः मन्त्रिमण्डलः भविष्यति। शस्योत्पत्तिः उत्तमं भविष्यति। कृषकाः लाभं प्राप्स्यन्ति। सूर्यप्रधानत्वात् अत्यधिकोष्णता भविष्यति, जलाभावः सूखा च सम्भाव्यते। किन्तु वर्षायाः स्थितिः सन्तोषजनका भविष्यति। धर्म, अध्यात्म, शान्ति च वर्धिष्यते। ऋग्वेदीय-परम्परायाः पुनः अनुभवः भविष्यति। पश्चिम-दक्षिणदिशायां खण्डवृष्टेः सम्भावना अस्ति।समाजे अनुशासनस्य वृद्धिर्भविष्यति। शासनव्यवस्थायाम् कठोरता वर्धिष्यते। उष्णतायाः वर्धनात् जलजन्यरोगाः तथा त्वग्विकाराः वर्धिष्यन्ति। सूर्यस्य प्रभावात् प्रशासनस्य नेतृत्वस्य च स्थैर्यं भविष्यति। सूर्यस्य राजा भवतः अतः भारतस्य शासनव्यवस्था विशेषमहत्त्वं प्राप्स्यति। केन्द्रशासनस्य प्रभावः सम्पूर्णभारते दृढं भविष्यति। प्रधानमन्त्री सर्वेषां मुख्यमन्त्रिणां विकासयोजनां निर्धारयिष्यति। सूर्यस्य प्रभावात् कतिपयस्थलेषु पशुप्राणिनां कष्टं सम्भाव्यते। कतिपय स्थलेषु प्रजाजनाः रोगादिभिः पीडिताः भविष्यन्ति। धान्यस्य उत्पादनं मध्यमं श्रेष्ठं वा भविष्यति। राष्ट्रान्तर-राजनीतौ नूतन-कूटनीतिः दृष्टिगोचरं भविष्यति। विश्वस्तरीय आर्थिक-व्यवस्थायाम् उत्तरणं उद्गमनं च भविष्यति। शासनव्यवस्थायाः निर्णयेषु गतिरोधः सम्भाव्यते। विदेशी मुद्रा सञ्चयः अपचीयते। साइबर-अपराधाः विकट-समस्या भविष्यति। उच्चतन्त्रज्ञानस्य सहारे शासनं नूतन-परिस्थितिभिः परीक्षितं भविष्यति। तथापि प्रशासनस्य दृढता समस्यायाः समाधानं करिष्यति। आस्तिकता वर्धिष्यते। भारतीयसंस्कृतौ धर्म-अध्यात्मचिन्तनं विशेषं भविष्यति। तीर्थाटनं वर्धिष्यते। आयुर्वेदोपचारः, वनौषधयः, समुद्रसंबद्धवस्तूनां मूल्यवृद्धिः भविष्यति। धातूनां मूल्येषु उतार-चढ़ाव: द्रष्टव्यः।

एषः संवत्सरः धर्मप्रधानः, कृषि-संवर्धकः, प्रशासनिक-नवाचारयुक्तः, किन्तु उष्णतायाः उग्रता व युद्धस्य सम्भावनां च सूचयति।

नूतनसम्वत्सरस्य अवसरे मार्चमासस्य सप्तविंशे दिनाङ्के सर्वेषां सनातनधर्मावलम्बिनां मार्गदर्शकः, कालविभाजनस्य सूचिकः, वैदिकपद्धत्याः संरक्षणकर्ता च 'सरस्वतीपञ्चाङ्गं उत्तराखण्डविद्वत्सभया वार्षिकपत्रिकायाः २०२४-२५तमस्य वर्षस्य वास्तुविशेषांकस्य लोकार्पणे अस्य पञ्चाङ्गस्य अपि विमोचनं कृतम्। तन्निर्मातारः धर्मनिष्ठाः, ज्योतिषशास्त्रपारङ्गताः, संस्कृतविद्याविशारदाश्च सन्ति। इदं पञ्चाङ्गं न केवलं तिथिनक्षत्रादिसूचनया सम्यक् ज्ञापनं करोति, अपितु धर्मकर्मणां महत्त्वं, पर्वकालविधानं, ग्रहगतिक्रमः, व्रतरचनायाः विश्लेषणं च यथावत् प्रदर्शयति।

तत्र सभाध्यक्षो विजेन्द्रप्रसादममगाईः, महासचिवः दिनेशप्रसादभट्टः, कोषाध्यक्षः अजयडबरालः च इत्येतान् समेत्य सम्पादकः राजेशअमोली अवदत् यद्भारतीयपञ्चाङ्गपरम्परायाः सजीवदर्पणत्वेन इदं पञ्चाङ्गं धर्मप्रेमिणां, ज्योतिषप्रवीणानां, साधकानां च सविशेषं हिताय कल्पते।

अस्मिन् पञ्चाङ्गे वेदपुराणशास्त्राणां प्रमाणेन प्रदत्ताः सूचनाः सर्वथा ग्राह्याः, प्रयोगसिद्धाः, लोकानुग्रहार्हाश्च सन्ति। उत्तराखण्डविद्वत्सभायाः आचार्यवर्याः, विद्विद्भिः, ज्योतिषाचार्यैश्च सह चर्चयित्वा एतन्निर्माणं कृत्वा यत् पञ्चाङ्गं लोकाय समर्पितं, तत् नूनं न केवलं इदानीन्तनायाः अपितु भविष्यतिः संततीनामपि कल्याणाय भविष्यतीति।

अस्य 'सरस्वतीपञ्चाङ्गस्य' प्रकाशनेन उत्तराखण्डविद्वत्सभा धार्मिकपरम्पराणां संरक्षणे, संस्कृतसंस्कृतेः संवर्धने, धर्मस्य प्रतिष्ठायाः संवर्धने च अतिश्रेष्ठं योगदानं दत्तवती। विद्वत्सभायाः सम्पूर्णेभ्यः सदस्येभ्यः हृदयपूर्वकं कृतज्ञतां निवेद्य भगवतीं दुर्गां प्रार्थये यत् 'यत्र पञ्चाङ्गज्ञानं तत्र धर्मस्य स्थितिः स्थिरा। धर्मे स्थिते जगत्सर्वं सुखमयं भूयादिति।'

भवदीया-**सम्पादिका**

# लघुशब्देन्दुशेखरे उपलब्धलौकिकतत्त्वानां भारतीयज्ञानपरम्परादृष्ट्या विवेचनम्

**-शुभम् नैलवालः**
शिक्षाशास्त्री प्रथम वर्ष
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली (११००१६)

भारतीयज्ञानपरम्परायाः इतिहासः अतीव प्राचीनः सुमृद्धश्च वर्तते। कियत्वर्षपूर्वम् अस्य प्रचलनमभवत् इति कोपि न जानाति। परम्परा इत्युक्ते सामान्यजीवनपद्धतिः, यां सर्वे जनाः ज्ञानतोऽज्ञानतः परिपालयन्ति। वस्तुतः कथं परम्परा भवेत् ? इत्यस्य कोपि एकाधारः नास्ति। यत् प्राचीनजनैः स्वयम् अन्विषितम्, अनुभूतं, प्रसारितं च तदनुरूपं तेषाम् अनुयायिनां जीवनपद्धतिः परम्पराारूपेण जाता। इदमेव कारणमस्ति यत् क्षेत्रानुसारेणापि जनानां लोकसंस्कृतिः, भोजनवस्त्रादिजीवनपद्धतिः भिन्ना भवति। कस्मिन् काले कीदृशी परम्परा आसीत् ? इत्यस्य अनुमानं वयं तत्काले रचितग्रन्थानाम् अनुशीलनं कृत्वा ज्ञातुं शक्नुमः।

अनेन प्रकारेण वैयाकरणनागेशभट्टकाले कीदृशी परम्परा आसीत् इति लघुशब्देन्दुशेखरग्रन्थं परिशील्य ज्ञास्यामः। नागेशभट्टस्य कालः १७३० ख्रीष्टाब्दः वर्तते, वैयाकरणेषु अयम् अर्वाचीनः।

लघुशब्देन्दुशेखरे नागोजिभट्टेन भट्टोजिदीक्षितेन कृता सिद्धान्तकौमुद्याः व्याख्या कृता। ग्रन्थारम्भे नागेशेन मङ्गलमाचरितम्। अस्याभिप्रायः वर्तते भारतीयज्ञानपरम्परायां ग्रन्थारम्भे भगवत्स्तुतिरूपेण विघ्नविघाताय त्रिविधमङ्गलमाचर्यते। वस्तुतः सर्वेषु ग्रन्थेषु ग्रन्थकाराः ग्रन्थस्य निर्विघ्नसमाप्त्यर्थं ग्रन्थारम्भे मङ्गलाचरणं कुर्वन्ति, नागेशेन 'शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो' मङ्गलाय मङ्गलाचरणं कृतम्।[1] मङ्गलाचरणे एव नागेशेन परम्परानुसारेण स्वपरिचयः मातुः पितुर्नाम तथा यतः लब्धजीविकः अस्ति तस्यापि वर्णनं कृतम्। भारतीयज्ञानपरम्परायामपि कस्यचित् कार्यारम्भे गणेशवन्दनादि क्रियते।

नागोजिभट्टेन **'स्थानिवदादेशोऽनल्विधौ'**[2] इत्यस्मिन् सूत्रे गुरुशिष्यपरम्पराविषये चर्चितम्, तत्रोक्तम् 'तत्स्थानापन्नस्तद्धर्मं लभते यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते' इति अर्थात् नागेशस्य समयेपि शिष्याः गुरुस्थाने गत्वा तदनुरूपं कार्यं सम्माननं च प्राप्नुवन्ति स्म। एषा परम्परा अद्यापि विभिन्नक्षेत्रेषु प्रतिनिधिरूपे दृश्यते।

भारतीयज्ञानपरम्परायाम् आशीर्वादस्य महत्वं वर्तते, इत्येवं प्रतिपादयति नागेशः **'प्रत्यभिवादेऽशूद्रे'**[3] इति सूत्रे तत्र प्रत्यभिवादः एवम् आशीर्वादः इत्यनयोः भेदः वर्तते। तत्रोक्तं यत् 'शूद्रे आशीर्वादरूपप्रत्यभिवादः दीयते, यथा कुशल्यसि तुषजक। गुरूचरणस्पर्शकाले गोत्र एवं नाम्नः उच्चारणं ब्राह्मणैः विधातव्यः। तत्र शर्मान्तं नाम ब्राह्मणस्य इत्यपि प्रतिपादितम्, तत्र नामशब्देन द्वादशेह्नि पित्रादिकृतं गृह्यते', अनेन परम्परा द्योत्यते यत् जन्मात् द्वादशदिवसे यत् नामं दीयते स एव वास्तविको नाम।

परम्परायां गृहस्थश्रमस्य महत्वं वर्तते, यत्र पतिपत्निसम्बन्धे जनाः स्वजीवनयापनं कुर्वन्ति, अस्मिन् विषये **'पत्युर्नोयज्ञसंयोगे'**[4] इति सूत्रे नागेशेन यज्ञसम्बन्धविषये चर्चितम्। तत्र दम्पत्योः सम्बन्धं यज्ञकार्ये फलभोक्तृत्वार्थं वर्तते विना पत्न्या यज्ञफलं न लभते, परम्परायामपि यज्ञकर्मणि दम्पत्ति एव अधिकारी भवति न तु केवलेकः।

'जपमनु प्रावर्षत्'[5] इत्युदाहरणस्य व्याख्यानसमये नागेशेन भारतीयज्ञानपरम्परायां होममाध्यमेन वृष्टेः वर्षणं संसूचितम्। तत्रोक्तं 'जपज्ञानेन हि कालविशेषविशिष्टा वृष्टिर्ज्ञाप्यते'। अनेन परम्परायां होममाध्यमेन प्राचीनाः वृष्टिं कारयन्ति स्म।

'कालाध्वनोरत्यन्तसंयोगे'[6] अत्र सूत्रे प्रत्युदाहरणे 'एकादश्यां रात्रौ जागृयात्' इत्युक्तम्। भारतीयज्ञानपरम्परायामपि एकादश्याम् अधुना व्रतादिकं तण्डुभक्षणनिषेधः आचर्यते। तस्मिन् काले रात्रौ जागरणमपि क्रियते स्म, वर्तमानेपि एकादश्यामेवम्विधप्रकारेण काचित् परम्परा वर्तते।

**'सहयुक्तेऽप्रधाने'**[7] इति सूत्रे कृषिविज्ञानस्य विषये उक्तं यत् 'माषवापोत्तरं तत्रैव क्षेत्रे तिलवापे तिलैः सह माषान्वपति' इति, एवम्प्रकारेण कृषिः अद्यापि क्रियते यत्र अनेकविधबीजानां वपनम् एकस्मिन्नेव क्षेत्रे क्रियते।

**'इत्थम्भूतलक्षणे'**[8] इति सूत्रे छात्रस्य स्वरूपविषये उक्तं यत् 'कमण्डलुपाणिं छात्रमद्राक्षीत्' इत्यनेन ज्ञातुं शक्नुमः यत् तस्मिन् काले छात्राः कमण्डलादीनाम् उपयोगं कुर्वन्ति स्म। अधुना कमण्डलुदर्शनेन सन्यीसीनां लिङ्गं द्योत्यते।

**'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'**[9] इति सूत्रे कथं पत्युः स्वभार्यां प्रति रक्षणसम्बन्धी क्रोधो भवति इति वर्णितम्। यदा कोपि अन्यः पुरुषः स्वभार्यां पश्यति तदा पतिः स्वभार्यायै ईर्ष्यति कुपति च, 'नात्र भार्या प्रति कोपः किन्तु परैर्दृश्यमानां तां पतिः न सहते'। एवम्प्रकारेण पतिद्वारा स्वपत्न्याः रक्षणं प्रति संकेतः कृतः।

नागोजिभट्टेन लघुशब्देन्दुशेखरे सिद्धान्तकौमुदीकारस्यैव मतानाम् ऊहापोहो कृतः वर्तते, तत्र भारतीयज्ञानपरम्परायाः ये स्रोतांसि सन्ति ते बहवत्र उपलब्धानि सन्ति प्रत्युदाहरणेन। यथा पूर्वमेव उक्तं यत् अर्वाचीनोयं वैयाकरणःतानि यानि भारतीयज्ञानपरम्परायाः स्रोतांसि सन्ति तासु बहूनि वर्तमानकालेपि तावदेव प्रचलितानि सन्ति काञ्चित् विकृतरूपेणापि जनैः आचरितानि सन्ति। वस्तुतः ग्रन्थोऽयं व्याकरणानुशासनात्मकः अतः यानि परम्परायाः उदाहरणानि मया प्राप्तानि तानि मया अत्र अतीव लघुरूपेण उपस्थापितानि इति।

1. लघुशब्देन्दुशेखरमङ्गलाचरणम्
2. लघुशब्देन्दुशेखरअच्सन्धिप्रकरणम् ४९ (१.१.५६)
3. लघुशब्देन्दुशेखरअच्सन्धौ प्रकृतिभावः (८.२.८६)
4. लघुशब्देन्दुशेखरस्त्रीप्रत्ययप्रकरणम् (४.१.३३)
5. लघुशब्देन्दुशेखर कारकप्रकरणम् (२.३.८)
6. लघुशब्देन्दुशेखर कारकप्रकरणम् (२.३.५)
7. लघुशब्देन्दुशेखर कारकप्रकरणम् (२.३.१९)
8. लघुशब्देन्दुशेखर कारकप्रकरणम् (२.३.२१)
9. लघुशब्देन्दुशेखर कारकप्रकरणम् (१.४.३७)

द्वितीयेपुटस्य शेषभागः

# सुवृष्टिहेतोः मासानां महत्त्वं योगदानं च

कर्कसंक्रमणे वृष्टिरवृष्टिः सिंहसंक्रमे।
कर्णपूरे वहेत् कन्या तुले निर्वातवृष्टयः।।

कादम्बिनी, पृ.१०८, कारिका ५२१-५२२

श्रावणशुक्लपक्षे यदि सिंहराशितः ऊर्ध्वभागे सूर्यस्य आगमनं स्यात् तर्हि समुद्रे प्रान्तदेशे पूर्णा वृष्टिः स्यात् परन्तु अन्यत्र आंशिकवृष्टिः भविष्यति।

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतएवंप्राच्यविद्याध्ययनसंस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लवर्यः अवदत् वृष्ट्यै भाद्रपदमासस्य विशेषमहत्त्वम् अस्ति। ग्रन्थकारः पं. ओझामहोदयः भाद्रपदमासविषये लिखति-

**प्रतिपत् सप्तमी भाद्रे द्वादशी च त्रयोदशी।**
**पूर्णिमा चासु वारुण्यां श्रितैर्मेघैः प्रवर्षणम्।।**
**भाद्र-शुक्ल-द्वितीयायां यदि चन्द्रो न दृश्यते।**
**तदा तेन भवेद् वर्षे सस्यसंपत्तिरुत्तमा।।**

कादम्बिनी, पृ.११४, कारिका ५५२-५५३

भाद्रपदमासस्य शुक्लप्रतिपत्तिथौ सप्तम्यां तिथौ द्वादश्यां तिथौ त्रयोदश्यां तिथौ पूर्णिमायां तिथौ पश्चिमदिशि मेघत्वात् समुचिता वृष्टिः भवति। भाद्रपदमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ चन्द्रमाः यदि न दृश्यते तर्हि संपूर्णे वर्षे समुचितम् अन्नं भविष्यति ।

आश्विनमासस्य विषये ग्रन्थकारो लिखति -

**नापेक्षते गर्भसिद्धिं चतुर्थी पञ्चमी तिथिः।**
**ग्रहयोगवशादेवाश्विने वर्षति तच्छुभम्।।**
**चतुर्थ्यामपि पञ्चम्यामाश्विने शीघ्रगर्भता ।**
**पञ्चभिः सप्तभिर्वा स्याद्दिनैरेकार्णवा मही।।**

कादम्बिनी, पृ.११८, कारिका ५७९-५८०

आश्विनमासस्य शुक्लपक्षस्य चतुर्थीतिथौ पञ्चमीतिथौ मेघस्य गर्भनिर्धारणस्य अपेक्षा नास्ति। तात्कालिकस्य ग्रहयोगात् तद्दिने या वृष्टिः भवति सा वृष्टिः शुभप्रदा भवति। आश्विनमासस्य शुक्लपक्षस्य चतुर्थीतिथौ पञ्चमीतिथौ शीघ्रं मेघस्य गर्भनिर्धारणं जायते। मेघगर्भधारणानन्तरं पञ्चदिवसैः सप्तदिवसैः पृथिव्यां सुवृष्टिः सञ्जायते।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य रणवीरपरिसरस्य वेद-पौरोहित्य-कर्मकाण्ड विद्याशाखाविभागस्य सहायकः आचार्यः डॉ. अनयमणित्रिपाठी, सस्वरं वैदिकमङ्गलाचरणं कृतवान्। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान। अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषयानुरागिणश्च सोत्साहं भागं गृहीतवा संगोष्ठीं सफलीचक्रुः।

# वेदः, योगः, आस्था च-त्रिवेणी संगमः शास्त्राणां गौरवमयं पर्व-हरिद्वारेण विश्वाय सनातनसंस्कृतेः संदेशः दत्तः

हरिद्वारम्। गङ्गायाः कलकलध्वनिः, सूर्यास्तस्य स्वर्णिमप्रभा, सहस्रदीपानां झलझलप्रभा, वेदानां विविधशास्त्राणां च दिव्यः निनादः–हरिद्वारस्य हरिपादिका पुनः अपि भारतीयसंस्कृतेः अद्वितीयवैभवस्य




साक्षिणी जाता। केंद्रीयसंस्कृतविश्वविद्यालयेन, नवदिल्ली, पतञ्जलिविश्वविद्यालयेन च संयुक्ततया आयोजितस्य द्विषष्टितमस्य अखिलभारतीयशास्त्रोत्सवस्य अन्तर्गतं भव्यः उत्सवः सम्पादितः, यस्य माध्यमेन भारतीयज्ञानपरम्परा विश्वमञ्चे प्रतिष्ठिता। एषः केवलं साधारणः आध्यात्मिकः उत्सवः न आसीत्, अपि तु एकः ऐतिहासिकः क्षणः अभवत्, यत्र देशस्य सर्वतः आगताः सहस्रसंख्याकाः विद्वांसः भक्तजनाः च सामूहिकतया शास्त्राणां श्रवणं कृत्वा गङ्गायाः आरत्या भागं गृहीत्वा विश्वकीर्तिमानं स्थापितवन्तः। सन्ध्याकालः, आकाशे रक्तिमच्छटा, गङ्गायाः शान्तलहरिषु सूर्यस्य मृदुलप्रतिबिम्बः, तीरेषु सहस्रसंख्याकाः श्रद्धालवृन्दाः चख्रएतत् वातावरणं स्वयमेव दिव्यं महोत्सवमिव प्रतीतं जातम्। हरिपादिकायाम् यदा वेदशास्त्राणां पाठः आरब्धः, तदा समग्रं ब्रह्माण्डं तेषां दिव्यध्वनिनां लयपरिचालितमिव प्रतीतं जातम्। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च, उपनिषदां श्लोकाः, भगवद्गीतायाः उपदेशाः, योगसूत्राणां गूढवचनानि चख्रएते सर्वे मिलित्वा दिव्यं महासंगीतं निर्मितवन्तः, यस्मिन् आध्यात्मिकता, दर्शनं, भक्ति च त्रिवेणीसंयोगेन झल्कन्ति स्म। शास्त्रश्रवणस्य अनन्तरं, यदा गङ्गायाः आरती आरब्धा, तदा सम्पूर्णं वातावरणं मंत्रमुग्धमभवत्। विद्वांसः, सन्तः, आचार्याः च विशालदीपमालाभिः आरतिं कृत्वा, घण्टानां निनादैः च वातावरणं पवित्रमकुर्वन्।

### ‘वेदाः अस्माकं इतिहासः अपि वर्तमानं च’ – स्वामी रामदेवः

अस्मिन्नेव अवसरस्य सन्दर्भे पतञ्जलिविश्वविद्यालयस्य कुलाधिपतिः योगऋषिः स्वामी रामदेवः उक्तवान् यत् ष्शास्त्राणि केवलं शब्दरूपेण न स्तः, किन्तु अमृतज्ञानरूपेण स्थितानि। यावत् भारतं स्वसंस्कृतिं



सनातनपरम्परां च स्वीकरिष्यति, तावत् विश्वे आध्यात्मिकता शान्तिः च प्रवाहिते भविष्यतः।’

तस्य सह आचार्यबालकृष्णः अपि उक्तवान् यत् ‘वेदाः शास्त्राणि च केवलं धार्मिकग्रन्थाः न, अपि तु जीवनयापनस्य कला अपि। एषु निहितः विज्ञानः, आयुर्वेदः, दर्शनं च सम्पूर्णं विश्वं मार्गदर्शयितुं समर्थम्।’

अत्र केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी अपि पतञ्जलिविश्वविद्यालयस्य एषां प्रयासानां प्रशंसा कृत्वा उक्तवान् यत् ‘अद्य सहस्रसंख्याकाः छात्राः शास्त्रकंठपाठं कृत्वा विश्वकीर्तिमानं स्थापितवन्तः।’

अन्ततः प्रो. साध्वी देवप्रिया उक्तवती यत् ‘अयं उत्सवः भविष्यस्य संततिषु प्रेरणास्रोतः भविष्यति, वेदानाम्, उपनिषदां, आयुर्वेदस्य, योगस्य च प्रचारं प्रसारं च वर्धयिष्यति।’

# काश्याः अन्नपूर्णामन्दिरस्य कुम्भाभिषेकयज्ञः सम्पन्नः

वाराणसी। काशीअन्नपूर्णामन्दिरट्रस्टेन विगते डेढ़मासपर्यन्तं सञ्चालितः विशालः कुम्भाभिषेकयज्ञः विद्वत्सत्कारद्वारा समारोपितः।



अस्य अध्यक्षता पूज्यः महन्तः शङ्करपुरीजी कृतवान्। पद्मभूषणपुरस्कृतः प्रो. वसिष्ठत्रिपाठिः सारस्वतात्मिथ्यरूपेण आसीत्, महामण्डलेश्वरः श्रीरामकमलदासवेदान्तिः मुख्यातिथिरूपेण स्थितः, तथा च संचालनं प्रो. रामनारायणद्विवेदी कृतवान्।

अस्मिन कार्यक्रमे प्रो. रमाकान्तपाण्डेयः, प्रो. माधवजनार्दनरटाटे, प्रो. हरीश्वरदीक्षितः, प्रो. पतञ्जलिमिश्रः, प्रो. विनयकुमारपाण्डेयः, प्रो. व्रजभूषणओझा, प्रो. धर्मदत्तचतुर्वेदी, डॉ. शुकदेवत्रिपाठी, प्रो. सदाशिवद्विवेदी, शोभारानी (कानपुर) इत्यादयः अनेकाः विद्वांसः वक्तारूपेण भागं गृहीतवन्तः।

# भारतीयज्ञानप्रकोष्ठस्य तत्त्वावधाने राष्ट्रियकार्यशाला सम्पन्ना

केंद्रीयसंस्कृतविश्वविद्यालयस्य भारतीयज्ञानप्रकोष्ठस्य तत्वावधाने २५-२७ मार्चपर्यन्तं राष्ट्रियकार्यशाला आयोजिताभवत्। अस्मिन त्रिदिवसीये कार्यशालायां द्वादशसत्रेषु भारतीयज्ञानपरम्परायाः विविधविषयेषु गहनविमर्शः कृतः। उद्घाटनसत्रस्य मुख्यातिथिः दिल्लीविश्वविद्यालयस्य



छात्रकल्याणडीनः प्रो. रंजनत्रिपाठिः अभवत्। सः स्वस्य उद्बोधने अवदत् यत् भारतीयज्ञानपरम्परा न केवलं प्राचीनकाले, अपितु अद्यापि विज्ञानचिकित्सागणितादिषु स्वीयां प्रासंगिकतां धारयति। भारतीयमनीषिणां योगदानं भविष्येऽपि अमूल्यम् भविष्यति। एषा भारतीयज्ञानपरम्परा सर्वासां पीढीनां प्रेरणास्रोतः अस्ति।

कार्यशालायाः अध्यक्षता केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिना प्रो. श्रीनिवासवरखेड़िना कृता। सः स्वस्य अध्यक्षीयउद्बोधने अवदत् यत् अद्य भारतम् आत्मप्रत्ययस्य युगे स्थितम् अस्ति, तथा च विश्वस्य प्रत्येकविषयं द्रष्टुं भारतीयदृष्टिः आवश्यकाः। भारतीयज्ञानपरम्परा एकत्वभावं समाहितवती अस्ति, यस्मिन् समन्वयशक्तिः अस्ति। आधुनिकतया सह समन्वयं कृत्वा शास्त्राणि समाजे पुनः स्थापनीयानि।

कार्यशालायाः संयोजकः डॉ. डी. दयानाथः अवदत् यत् अस्य कार्यशालायाः उद्देश्यं भारतीयज्ञानपरम्परायाः विविधविषयेषु गहनविमर्शः अस्ति। भारतः सहस्राब्द्यः ज्ञानस्य पर्यायः अस्ति, भारतीयदर्शनविज्ञानगणितसाहित्याध्यात्मादयः विश्वे विशिष्टस्थानं प्राप्तवन्तः। सः अवदत् यत् भारतीयज्ञानपरम्परा अखण्डभारतस्य अवधारणाम् प्रतिबिम्बयति, यत्र वेदाः, वेदाङ्गानि, पुराणानि, वास्तुशास्त्रं, ज्योतिःशास्त्रं च ज्ञानस्य अमूल्यस्रोतः सन्ति।

कार्यशालायां केंद्रीयसंस्कृतविश्वविद्यालयस्य विविधपरिसराणां आदर्शमहाविद्यालयानां च प्राध्यापकाः प्रतिभागिरूपेण भागं गृहीतवन्तः। संसाधकानाम् मध्ये डॉ. नवीनभट्टः (चाणक्यविश्वविद्यालयः, बेंगलुरु), डॉ. मुनीतधीमानः (बेंगलुरु), डॉ. साईसुसरलः (एम.आई.टी., पुणे), डॉ. गिरीशभट्टः (तिरुपति), डॉ. जे. श्रीनिवासः (हैदराबाद), डॉ. केतुरामचन्द्रशेखरः, डॉ. शिवकुमारः (इंडिका), डॉ. गंटी एस. मूर्तिः (आई.के.एस. विभागः, शिक्षामन्त्रालयः, भारतसरकारः) इत्यादयः प्रमुखाः विद्वांसः आसन्।

कार्यक्रमे विश्वविद्यालयस्य अकादमिकडीनः प्रो. मदनमोहनझाः अतिथीनां स्वागतं कृतवान्। धन्यवादज्ञापनं प्रो. कुलदीपशर्मणः (विशेषाधिकारी, नियुक्तिप्रकोष्ठः) कृतवान्। सत्रस्य संचालनं डॉ. पवनव्यासः कृतवान्।

# संस्कृतभाषाशिक्षणस्य प्रथमं सोपानं संस्कृतभाषायाः व्यवहारः-मनीषदीक्षितः

(वार्ताप्रेषकः- प्रवेशकुमारशुक्ल, लखनऊ)

उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितायाः आनलाइनप्रशिक्षण-पाठ्यक्रमनिर्माणयोजनायाः अन्तर्गतं प्रेरणासत्रायोजनक्रमे सत्रस्य आरम्भः सरस्वतीवन्दनयाऽभवत्। कार्यक्रमेऽस्मिन् सरस्वतीवन्दना शशांकमहोदयेन संस्थानगीतिका अनुष्ठामहोदयया, स्वागतगीतं किरनयादवेनप्रशिक्षिका- डॉ०श्वेतावरवालमहोदयया च अतिथीनां परिचयपुरस्सरं समेषां स्वागतं कृतम्। प्रशिक्षुषु स्नेहा, किरणयादवः , वैष्णवी, स्वातिपौराणिकः, डॉ. विदुषी हिमानी च अनुभवकथनं गीतानि च प्रस्तुतवत्यः।

प्रेरणासत्रस्य मुख्यवक्ता मनीषदीक्षितमहोदयः स्वोद्बोधने संस्कृतभाषायाः महत्त्वं प्रकाशयित्वा अद्यत्वे भविष्ये च संस्कृतस्य उपयोगितायाः विषये सर्वान् बोधितवान् । प्राचीनकाले वेदाः , पुराणानि, उपनिषदः इत्यादयः संस्कृतभाषायाम् आसन् । अस्मिन् काले ग्रन्थाः एव न संस्कृतभाषायाम् आसन् अपितु लोकभाषा अपि संस्कृतम् एव आसीत्।

आधुनिकयुगः सङ्गणकयुगः वर्तते। एवं सङ्गणकस्य भाषाऽपि संस्कृतभाषा अस्ति। अस्मिन्नेव क्रमे प्राचीनकालस्य वर्तमानकालस्य च दिनचर्याविषये साररूपेण अवदत्। भाषा भावानां विचाराणां प्रकटीकरणाय भवति । भाषा श्रवणेन आगच्छति न तु पठनेन लेखनेन वा । यः उत्तमः वक्ता सः उत्तमः श्रोताऽपि भवति , यः उत्तमः लेखकः भवति सः उत्तमः पाठकोऽपि भवति। सर्वे संस्कृतस्य विषये चिन्तनं कुर्वन्तु एवं संस्कृतस्य प्रचारं प्रसारञ्च कुर्वन्तु इति ।

प्रशिक्षिका सवितामहोदया अतिथिभ्यः कृतज्ञतां प्रकटितवती। महेन्द्रमिश्रमहोदयः सम्पूर्णं तकनीकिसहायतां कृतवान्। सत्रस्य सञ्चालनं प्रशिक्षिका अनीतावर्मा महोदया कृतवती।


कार्यक्रमे उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रशासनिकपदाधिकारी जगदानन्द झा, दिनेशमिश्रः, योजनाप्रमुखः भगवानसिंहचौहानः, प्रशिक्षणप्रमुखः सुधिष्ठकुमारमिश्रः, समन्वयकः थीरजमैठाणी, दिव्यरञ्जनः, राधाशर्मा प्रशिक्षकः हरिश्चन्द्रमिश्रः उपस्थिताः आसन्।

रागसुधा(लन्दनतः) २१ मार्च २०२५ दिनांके यूके-देशे प्रस्तुतं सप्तमातृकास्तोत्रे संस्कृते नृत्यम् । दिव्यमातृदेव्याः सप्तमातृकायाः कथा लण्डन्नगरस्य भारतीयविद्याभवने अद्यैव मनोहरशास्त्रीयनृत्यप्रदर्शनद्वारा संस्कृति- सांस्कृतिक-उत्कृष्टताकेन्द्रेण प्रस्तुता अस्ति। मत्स्यपुराणात् स्रोतः प्राप्तं शक्तिशालि



संस्कृतस्तोत्रं मातुः प्रेम, मूल्यं, ज्ञानं, रक्षणं च इति सर्वं बहुआयामि-भूमिकायाः श्रद्धाञ्जलिरूपेण प्रस्तुतम्। अस्मिन् अवसरे महामहिमराजा चार्ल्स इत्यस्य संस्कृतिकेन्द्रं प्रति शुभकामनासन्देशः पठितः। मातृवन्दना इति शीर्षकेण सप्तमातृकाणां रक्तबीजेन सह युद्धस्य कथा प्रकाशिता, यत् भरतनाट्यम्, कूचिपूडी, कथक, मोहिनीअट्टम, मणिपुरी इत्यत्र प्रज्ञा-अज्ञानयोः संघर्षस्य प्रतीकम् आसीत्। रागसुधा विंजमूरी, सान्विका कोम्मिनेनी, श्रीललिता कोटला, प्रिया कुशवाहा, देबांजली बिस्वास, लक्ष्मी अवीन, मंजू सुनील द्वारा विविधनृत्यशैली प्रस्तुता।नृत्तचित्रस्य प्रदर्शनं देबाब्रतपालेन चामुण्डस्य चित्रणं कृतम् ।

# वर्षं वर्षं हर्षवर्षम्



प्रो. ताराशंकरशर्मा पाण्डेयः

सिद्धार्थनाम २०८२संवत्
सिद्ध्यर्थं कालयुक्तो' रघुपतिविजयो- त्कर्षहर्षोद्भवोयं
सिद्धार्थः सिद्धिवर्षो युग-वसु-ख-युगो
वैक्रमाब्दो विशेषः।
आदित्यो राजमन्त्रि-द्विविधधृतपदः सूर्यवारेऽभियातो
विश्वोद्धर्षाय भूयाज्जगति जनमनो- विश्वबन्धुत्वमन्त्रः।। १।।
२०८२ संवत् को उज्जैन आदि में 'कालयुक्त' नाम से तथा राजस्थान
आदि में 'सिद्धार्थ/ सिद्धार्थी' के नाम से माना गया है ।
हर्षावहं मित्र ते वर्षं नूत्नप्रमोदचिन्तनचरं
हर्षावहं मित्र ते मासः स्यात्सुखदः
सदा सुरभितस्- ते स्वाभिमानोन्नतः।
सप्ताहः शुभदः समस्तफलदो भोज्यादिपानोत्सवः
सोत्साहो दिवसो वशङ्गतरसो मानप्रसन्नो भवेत्।। २ ।।
प्रत्नं नूत्नं किमास्ते समयसुविहितं ज्ञास्यते चर्चया यत्
सद्यो भूतं भविष्यं नवमिव भविता चित्तकर्षाभिरामम् ।
तस्मान्नद्धः प्रभूया नवनवसहसा कर्म कर्तुं नवीनं
येन स्यात् कीर्तिवृद्धिः परमसुखकरी व्यापिनी सर्वलोके ।।३।।
मधु मधु कुरुते वर्षो आयो नवो है जनजनहृदये हर्ष छायो बहूत
धीरै धीरै बढ़ैगो शिशुगतिरिव यः पांव फैलाय जाण।
बढ़्यां तो बोल सोणा मधु मधु कुरुते हंसता हंसता रे!
काई काई करैगो मनसि हि सुमनाः आज थोड़ो विचार।। ४ ।।

# अभिनववसन्तगीतिका



-डॉ. अरविन्दकुमारतिवारी

न याहि प्रिये! मां विहायारविन्दम्।
वसन्तोत्सवो मां स्पृशति मन्द- मन्दम्।
वनेषु द्रुमाः पीतपत्राणि हित्वा
नवं पल्लवं प्रसुवते हन्त जित्वा
पिकानां कुलं प्रेक्षते माममन्दं
न याहि प्रिये मां विहायारविन्दम्।। १
ममोद्यानमेतत् प्रसूनप्रफुल्लं
मनो मामकं कर्षतीवाद्य मल्लम्।
अलीनां भ्रमति पुष्पकुञ्जेषु वृन्दं
न याहि प्रिये मां विहायारविन्दम्।। २
अयं पाटलः प्रेयसीकेशपाशं
सुखं संस्पृशति पश्य प्रेमप्रकाशम्।
किरति पुष्परागं प्रियं माकरन्दं
न याहि प्रिये मां विहायारविन्दम्।। ३
वसन्ते दयस्वेति सम्प्रार्थयेऽहम्
प्रियन्ते करिष्ये हृदाभ्यर्थयेऽहम्।
दहति पुष्पधन्वा न कं प्रेमनन्दं
न याहि प्रिये मां विहायारविन्दम्।। ४
मयूरो मयूरीं शुकीं श्रीशुकोऽयं
मृगीं वा मृगः सेवतेऽस्मिन् वनेऽयम्।
अये! निर्दये! कोपने! मुञ्च द्वन्दं
न याहि प्रिये! मां विहायारविन्दम्।। ५
सृजन्तीव सर्वे कवीन्द्राः सुगीतिं
सदातन्वते गेहिनां रागरीतिम्।
ददस्वादृते द्राग् नवानन्दकन्दं
न याहि प्रिये मां विहायारविन्दम्।। ६
शुभे! सर्जने! सत्कवेः काव्यलोके
मुदा भ्राजसेऽनादिकालाद् विशोके।
भजस्वानतं कञ्चिदेनं मिलिन्दं
न याहि प्रिये मां विहायारविन्दम्।। ७

# अभिनवस्तुतिः



डॉ० निरञ्जन मिश्रः

शिवे सत्यश्रद्धे ऋषिमुनिवचोभिस्सुविदिते
रणक्षेत्रे क्रूरे बुधजनविलासे प्रमुदिते।
त्वदर्चायां लीनो मधुवचनदीनः स्तुतिविधौ
प्रवृत्तो येन स्यात्तदिह नवलेखखं लिख शिवे ।।1।।
जगन्मातः सत्यं सरति नहि कण्ठादिह मम
स्तुतिं कर्तुं चेच्छा प्रभवति सदा मे दृढतरा।
त्वदग्रे चासत्यग्रहणमिह भीतिं जनयति
त्वदाशीर्वादो मे कथमिह भवेच्चिन्तय शिवे !।।2।।
त्वदीया या कीर्तिर्विदितबुधवृन्दप्रवचने श्रुता,
तस्या अग्रे किमिति नहि जाने गिरिसुते।
श्रुतायाश्चेद्घ्गानं कथमिह भवेत्सा फलवती
रसेनैकेनैव प्रभवति कुतो वा मधुरिमा ।।3।।
त्वमेवैका वन्द्या त्रिभुवनगतानां गुणमयी
त्वदर्चायां लीना विधिहरहरा वाऽसुरसुराः।
इदं यद्वाक्यं तन्नहि तव मनोमोदनकरं
स्तुतिस्ते चाटूक्त्या कथमिह भवेच्चिन्तय शिवे ।।4।।
सदा स्वार्थग्रस्तो जगदघविनाशप्रवचनं
त्वदने कुर्वन् यो विलसति न तस्यास्म्यनुचरः।
खलानां पाशो यो नयनपथगामी भवति नो
सतां मुक्तिस्तस्मात्कथमिह भवेच्चिन्तय शिवे ।।5।।
बुधैर्यद् यद्गीतं तव मधुरगानं प्रतिपदं
तदेवान्तर्भावे प्रवहति सदा मे विधिनुते।
परञ्चाहं पापाचरणरतिलीनस्तव यशः
कथं गास्यामीति स्वयमिह निदेशं कुरु शिवे ।।6।।
त्वया दत्तं सर्वं प्रमुदितसुमं जीवनवने
परं लब्धं तन्न स्मरति सततं यन्मम मनः।
विना तत्किं द्रव्यं किमिह भवनं वाहनसुखं
प्रसादात्ते तन्मे कथमिह भवेच्चिन्तय शिवे ।।7।।
न जानामि कीर्तिं न वा गानरीतिं
न चाटूक्तिमार्गे मदीयाप्रवृत्तिः ।
यथा याचना मे तथाभ्यर्थना मे।
प्रवृत्तिर्निवृत्तिस्तु हस्ते त्वदीये ।।8।।
कृता याचना नो मया नास्ति चिन्ता
मदर्थं त्वया स्याच्च चिन्ता कथन्न।
कुपुत्रोऽपि चेन्नैव माता विरुद्धा
सुतस्यास्ति किं तस्य सर्वं जनन्याः ।।9।।

# संस्कृतेः रक्षणं केवलं मूल्यानां अङ्कुरेण एव सम्भवति-राज्यपालः

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थस्य महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य पञ्चमदीक्षान्तसमारोहस्य आयोजनम् एकत्रिंशत् तमे दिनाङ्के उज्जयिन्याम् कालिदासाकादमी परिसरे अभवत्। कार्यक्रमस्य अध्यक्षः प्रदेशस्य माननीयः राज्यपालः विश्वविद्यालयस्य कुलाधिपतिः च श्रीमान्मङ्गुभाईपटेलवर्यः आसीत् । महोदयेन दीक्षान्तोपदेशे उक्तं यत् भारतीयशास्त्राणां संरक्षणे ज्ञानपरम्परायाः च प्रचारार्थं पाणिनिसंस्कृतविश्वविद्यालयः सराहनीयं कार्यं कुर्वन् अस्ति। महोदयेन 'A' श्रेण्यां प्रत्यायनार्थं विश्वविद्यालयकुटुम्बस्य अभिनन्दनं च कृतम्। महोदयः छात्रान् सम्बोधयन् उक्तवान् यत् संस्कृतशास्त्रस्य गौरवपूर्णपरम्परा सम्पूर्णे विश्वे प्रचारितव्या। संस्कृतशास्त्रेषु करुणा, संवेदनशीलता, संस्कृतिः च अन्तर्भूता वर्त्तन्ते। समयस्य, शिक्षायाः च सदोपयोगेन व्यक्तिः जीवने सफलः महान् च भवति । उपाधिं प्राप्तानां सर्वेषां छात्राणां अभिनन्दनं कृत्वा महोदयः आह्वानं कृतवान् यत् छात्राः संस्कृत्या-संस्कारेण-परम्परया सह धैर्यपूर्वकं अध्ययनेन स्वमातापितृणां सेवां च कुर्वन्तु इति अस्माकं कर्तव्यम्। मुख्यातिथिः प्रदेशस्य उच्चशिक्षातकनीकी-आयुषमन्त्री

श्रीमान्इन्दरसिंहपरमारवर्यः अवदत् यत् संस्कृतस्य छात्राः भारतीयज्ञानपरम्परायाः सम्वाहकाः सन्ति।

अयं संस्कृतस्य युगः प्रचलति भारतभूमिः प्राचीनकालात् एव ज्ञानस्थली भारतं पुनः विश्वगुरुं कर्तुं वयं अग्रे गच्छामः। संस्कृतं योगगायुर्वेद-विज्ञानस्य च जननी। सारस्वतातिथिः आचार्यः बालकृष्णः,माननीयः,कुलपतिः पतञ्जलिविश्वविद्यालयः, हरिद्वारस्य अवदत् यत् दीक्षान्तः छात्राणां परिश्रमस्य सम्मानस्य च आयोजनं भवति। शिक्षा अस्मान् मोक्षस्य मार्गं दर्शयति। अस्माकं ज्ञानं सद्भावाय जनहिताय च भवेत्। संस्कृतस्य छात्राः भारतीयज्ञानपरम्परायाः सम्पूर्णे विश्वे प्रचारार्थं कटिबद्धः भवेयुः।केंद्रीयसंगीतनाटककादमी, नवदेहली इत्यस्य अध्यक्षा डॉ. संध्यापुरेचामहोदया उक्तवती यत् संस्कृतं वेदोपनिषदविज्ञानस्य च भाषा सर्वतोमुखविकासाय संस्कृतं सर्वाधिकम् उपयुक्ततमं वर्त्तते। कलाज्ञानसंरक्षणाय च संस्कृताध्ययनम् आवश्यकम्।




कार्यक्रमे विशिष्टातिथिरूपेण बालयोगीसंतउमेशनाथमहाराजः, राज्यसभासांसदः वाल्मीकीधाम, पीठाधीश्वरः च उपस्थितः आसीत्। एवञ्च उज्जयिनी सांसदः, श्रीमान्अनिलफिरोजिया वर्यः ,उज्जयिनीउत्तरक्षेत्रस्य विधायकः श्रीमान्अनिलजैनवर्यः (कालुहेडा) उपस्थिताः आसन्। प्रस्तावना, अतिथिपरिचयः च माननीयः कुलगुरुः प्रो.विजयकुमारसीजीवर्यः प्रस्तुवन् विश्वविद्यालयस्य उपलब्धीनां प्रगतिप्रतिवेदनं च प्रस्तुत्वान् । अस्मिन्नवसरे कुलगुरुणा लिखितं पुस्तकं राज्यपालेन विमोचितम्। कुलसचिवेन प्रो.दिलीपसोनीमहोदयेन आभारं प्रकटितम् । समारोहे कार्यपरिषद्सदस्याः डॉ. विश्वासव्यासः,अधिवक्ता गीतांजलिचौरसिया, श्रीमान्गौरवधाकडः, डॉ.हरीशव्यासः, श्रीमतीसुमिना अनिललिग्गा, डॉ. केशरसिंहचौहानः, डॉ.अजयसिंहराठी, संबद्धमहाविद्यालयस्य, प्राचार्याः संकायप्रमुखाः, विभागाध्यक्षाः प्राध्यापकः,विद्वान्सः, छात्राः अन्ये गणमान्यजनाः च उपस्थिताः आसन् द्य कार्यक्रमस्य सञ्चालनं समन्वयकेनः डॉ.उपेन्द्रभार्गववर्येण कृतम् । समारोहे २०२२-२३ सत्रे उत्तीर्णाः १३४९ स्नातकाः २०२३-२४ सत्रे च उत्तीर्णाः १०१२ छात्राः उपाधिं प्राप्तवन्तः। ७९ छात्राणां कृते राज्यपालमहोदयेन स्वर्ण-रजत-कांस्यपदकैः सह उपाधिः प्रदत्ताः । तेषु ५ विद्यावारिधिः (पीएचडी) २६ स्वर्णपदकानि, २५ रजतपदकानि, २३ कांस्यपदकानि च प्रदत्तानि। विश्वविद्यालयेन पतञ्जलियोगविश्वविद्यालयस्य कुलपतये आचार्यबालकृष्णवर्याय योग-संस्कृत-आयुर्वेदस्य च क्षेत्रे योगदानाय एवमेव नृत्य-नाट्यस्य च क्षेत्रो योगदानाय केंद्रीय संगीत-नाटक-अकादमी-नवदेहली इतस्य अध्यक्षायै डॉ. संध्यापुरेचामहोदयायै (डी.लिट्) महामहोपाध्यायस्य उपधिना विभूषिता।

# उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः 'नैक'(NAAC) द्वारा 'A' श्रेण्यां प्रत्ययायितः

डॉ.दिनेश चौबे, उज्जयिनी

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) इत्यनेन उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिक विश्वविद्यालयः सप्तबिन्दूपरिमाणे ३.०८-सीजीपीए-सहितं 'A'-श्रेण्यां प्रत्ययायितः। अस्य वैधता २७-०३-२०२५ दिनाङ्कदारभ्य पञ्चवर्षावधि पर्यन्तं भविष्यति। विश्वविद्यालयस्य अस्याः उपलब्धेः विषये ज्ञात्वा प्रदेशस्य मान्यः राज्यपालः विश्वविद्यालयस्य कुलाधिपतिः च श्रीमान्मङ्गुभाईपटेलवर्यः सहैव राज्यस्य मान्यः मुख्यमन्त्री डॉ. मोहनयादववर्यः च शुभकामनाः आनन्दं च प्रकटितवन्तौ। मान्यः उच्चशिक्षामन्त्री इन्दरसिंहपरमारवर्यः दूरभाषेण विश्वविद्यालयपरिवारं शुभकामनाः प्रेषितवान्। विश्वविद्यालयस्य मान्यः कुलगुरुः, आचार्यः विजयकुमारसीजीवर्यः विश्वविद्यालयस्य सम्बद्धमहाविद्यालयानां, प्राचार्यान् , संकायप्रमुखान्, विभागप्रमुखान् , आचार्यान् ,छात्रान् च सम्बोधयन् अस्याः उपलब्धिविषये उद्घोष्णा कृतवान् । महोदयेन उक्तं यत् अनया उपलब्धया भारतीयज्ञानपरम्परायाः सुदृणतया प्रचार - प्रसारं च वर्धयिष्यति तथा च अनेकेषां शैक्षणिकावकाशानां मार्गो च उद्घाटितो जातः , येन अनुसन्धानकार्ये नवीनतां च प्रवर्धयिष्यति। तथा च नूतनाः पाठ्यक्रमाः अपि आरभ्यतुं शक्यन्ते। महोदयः अवदत् यत् एषा अपूर्वा सफलता विश्वविद्यालयस्य सर्वेषां समर्पितानां शिक्षकानां, कर्मयोगिनां, छात्राणां च अथकपरिश्रमस्य परिणामः अस्ति। 'कर्म एव पूजा' इति मन्त्रात् एव एतत् सम्भवम्। महोदयः अस्मिन्नवसरे विश्वविद्यालयाय दत्तस्य मार्गदर्शनस्य समर्थनस्य च कृते राज्यस्य मुख्यमन्त्रीं, उच्चशिक्षामन्त्रीं च प्रति आभारं प्रकटितवान्। तथा च विश्वविद्यालयपरिवारस्य अभिनन्दनं कृतवान्। ऐतिहासिकोपलब्धिविषये प्रसन्नतां प्रकटयन् कुलसचिवेन प्रो. दिलीपसोनीमहोदयेन उक्तं यत् विश्वविद्यालयस्य कृते अयं परिणामः बहुप्रतीक्षितः आसीत्। तत्र वहव्यः समस्याः आसन् तथा च प्रथमवारं एनएएसी मूल्याङ्कनम् अस्माकं कृते चुनौतीपूर्णम् आसीत् किन्तु कुलपतेः मार्गदर्शनेन सर्वेषां सामूहिकप्रयत्नेन च एषा सफलता लब्धा।

आईक्यूएसी निदेशकः डॉ. तुलसीदासपरोहामहोदयेन उक्तं यत् कुलगुरुः कार्यभारं स्वीकृत्य एव (एनएएसी) मूल्याङ्कनं करणीयं इति विषये स्वाभिप्रायः अवदत्। यस्य परिणामेन अद्य विश्वविद्यालयः उत्तमश्रेण्या सह प्रत्यायितः, विकासमार्गे तीव्रगत्या च प्रगतिशीलः वर्त्तते। एनएएसी संयोजकः डॉ. शुभमशर्मवर्यः उक्तवान् यत् अस्माकं दृढनिश्चयेन इच्छाशक्तिबलेन च इतिहासः रचितः अस्मिन् कर्मणि सम्पूर्णस्य विश्वविद्यालयपरिवारस्य अभूतपूर्वपरिश्रमः सङ्कल्पः च समाहितः आसीत्।

# संस्कृतप्रशिक्षणवर्गः

नवदेहली। दिल्ली विश्वविद्यालयस्य संस्कृतविभागेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य संस्कृतभारती,देहली इत्येतेषाञ्च संयुक्ततत्त्वावधाने दिल्ल्यां संस्कृतप्रशिक्षणवर्गः समुद्घाटितः । कार्यक्रमे विभिन्नस्तरेषु सोद्देश्यं संस्कृतस्य प्रचारप्रसाराय सङ्कल्पः पुनस्स्मारितः।



संस्कृतप्रशिक्षणवर्गोऽयम् अस्य मासस्य एकोनविंशति दिनाङ्कात् अष्टाविंशतिदिनाङ्कं यावत् प्रातः नववादनात् सायं सार्ध पञ्चवादनं यावत् प्रचलति । आगामिवर्षस्य त्रयोविंशतिदिनाङ्काद् विभिन्नस्थलेषु १००८ संस्कृतशिबिराणि प्रचाल्यन्ते स्म, अपि च मईमासे एतेषां समेषां जनानाम् एकत्रीकरणम् इन्द्रागान्धी-आन्तरिक-क्रीडाङ्गणे भविता।

कार्यक्रमेऽस्मिन् दिल्ली विश्वविद्यालयस्य महाविद्यालयीय प्रतिष्ठापकः बलरामपाणिः वर्यः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रो. पवनकुमारः, संस्कृतभारत्याः उत्तरक्षेत्रसङ्घटनमन्त्री श्रीमन् नरेन्द्रकुमारः मुख्यवक्तृरूपेण अथ च संस्कृतभारत्याः देहलीप्रान्ताध्यक्षः श्रीमन् वागीशभट्टः, संस्कृतविभाग-दिल्ली विश्वविद्यालयस्य अध्यक्षः प्रो. ओमनाथबिमलीः, प्रो. भारतेन्दुपाण्डयः, प्रो. रणजित् बेहेरा च उपस्थिताः आसन्।

प्रो. रणजितबेहेरावर्यः कार्यक्रमस्य प्रारम्भे चतुर्षु उद्देश्यबिन्दुषु समेषां ध्यानम् आकर्षयत्।

प्रो. बलरामपाणिः सबलं प्रत्यपादयत् यत् सम्यक् कृतिः संस्कृते वर्तते। संस्कृतम् अस्मदीया भाषा वर्तते अस्मदीया शक्तिः, स्वभाषया जनाः मोमुद्यमानाः भवन्ति। संस्कृतोच्चारणेन रक्ते आक्सीजनवायुः वर्धते। तेन अस्मदीयं शारीरिकं मानसिकञ्च भवति। संस्कृतात् संस्कृतिः, संस्कृतेः समृद्धिर्भवति।

श्रीमन् नरेन्द्रकुमारोऽवादीत् यत् संस्कृतकार्यम् ईश्वरीयकार्यं, एतदीश्वरीयकार्यार्थं भगवता वयं चिताः। वयं सर्वे महत्त्वभूताः स्म। पुण्यभूमिभारते अस्मदीयं जन्म ईश्वरकार्यार्थं जातम्। दिल्ली देशस्य हृदयम् अस्ति अतः हृदये संस्कृतस्य स्फुरणं भवति चेत् आभारतं संस्कृतमयं भविष्यति। अस्माभिः स्वीया भाषा, संस्कृतिः धारणीया। अस्मदीय ग्रन्थेषु एकमेकं वाक्यं महत्त्वभूतं वर्तते। संस्कृतवायुमण्डलस्य निर्मातारो वयम्। मदीयं जीवनं, मदीयं समग्रचिन्तनं संस्कृतप्रचाराय भवतु । संस्कृतस्य उन्नायकाः वयम् । यत्र संस्कृतम् अस्ति तत्र वैभवं भवेत्, यत्र संस्कृतं नास्ति तत्र वयं संस्कृतम् आनयामः।

सम् -सङ्गणकस्य भाषा संस्कृतम्
यो -योगस्य भाषा संस्कृतम्
गी -गीतयाः भाषा संस्कृतम्
आ -आयुर्वेदस्य भाषा संस्कृतम्
वा -वेदस्य भाषा संस्कृतम्

सम् यो गी आ वा इति मन्त्रेण भारतं विश्वगुरुः भविष्यति।

सङ्गणके एते चत्वारः शब्दाः स्थापनीयाः -
पद-सुप्तिङन्तं पदम्
वाक्य'
प्रमाण-अमरकोशादिकम्
तर्क-

वागीशभट्टमहोदयः उक्तवान् यत्-अयङ्कार्यक्रमः कणादभवने जायते अतोऽस्मात्कारणात् वयं प्रत्येकं कणं संस्कृतवातावरणं कुर्मः। संस्कृतप्रचाराय अस्माभिः किञ्चिद् समयो दातव्यः।

प्रो.पवनकुमारोऽभ्यभाषत यत्-इदानीं संस्कृतमयं वातावरणं विद्यते। बाली स्थाने संस्कृतशिविराणि आयोजितानि। इन्डोनेशिया देशे संस्कृतभारत्याः नैके कार्येकर्तारो निवसन्ति।

प्रो. बिमलीवर्यो कार्तज्ञवचोभिः भारतीयज्ञानपरम्परायाः उन्नत्यर्थं सस्कृतज्ञानाम् उत्तरदायित्वम् उदलेखयत्। ज्ञानकारणेन कोऽपि देशः पूर्णतां विश्वगुरुं वा याति। संस्कृतप्रचारप्रसाराय वयं प्रवृत्तामहे।

# दशदिवसीया संस्कृतसम्भाषण-कार्यशाला सम्पन्ना

पटियाला। सरस्वती-आयुर्वैदिक-चिकित्सालयः एवं चिकित्सकीय महाविद्यालयः तथा संस्कृतभारती पञ्जाबप्रान्तः इत्यनयोः संयुक्ततत्त्वाधने आयोजिता दश-दिवसीय - संस्कृतसम्भाषण-कार्यशालायाः अद्य समापनं जातम्। समापनकार्यक्रमस्य शुभारम्भः अतिथिभिः दीपप्रज्ज्वालनेन एवञ्च दीपमन्त्रेण जातम्। कार्यक्रमे छात्रेभ्यः सरस्वतीवन्दना, संकल्पः, उद्देश्यगीतम्, अनुभवः, नाटकम् इत्यादयः प्रस्तुत्यः कृताः। अस्मिन्



कार्यक्रमे मुख्यातिथि-रूपेण डॉ. वीरेन्द्रकुमारः संस्कृतभारती, पञ्जाबप्रान्ताध्यक्षवर्यः आसीत् । महोदयेन 'आयुर्वेदं संस्कृत माध्यमेन कथं पठामः' तथा 'आयुर्वैदिकजनानां कृते संस्कृतं किमर्थम् आवश्यकम्' तथा चरकसंहिता च सुश्रुत संहितायाः विषये निजविचाराः प्रस्तुताः। मुख्यवक्तारूपेण पंजाबप्रान्तस्य प्रान्तसहमन्त्री श्रीमन् अजय आर्यः उपस्थितः आसीत्। महोदयेन संस्कृतस्य रक्षणं कथं भवेत् इत्यस्मिन् विषये बोधितम्। श्रीमन् गोस्वामीवर्यः सरस्वती आयुर्वैदिक महाविद्यालयस्य डायरेक्टर आसीत्। महोदयेन प्राचीनशिक्षा-पद्धत्याः विषये उक्तम्। प्राचार्यया डॉ. शारदा महोदयया आगतानाम् अतिथीनां उपहारेण स्वागतं कृतम्। अस्यावसरे डॉ.अमनदीप महोदया संहिता विभागाध्यक्षा,श्रीमन् नरेशवर्यः संस्कृतविभागस्य आचार्यः च उपस्थिताः आसन्। कार्यक्रमेऽस्मिन् ७५ प्रतिभागिनः आसन् । प्राचार्य- महोदयया महाविद्यालय- पक्षतः मनीष-विस्तारकस्य रजनी विस्तारिकायाः च सम्मानः कृतः। कार्यक्रमे विभिन्नाः प्रस्तुत्यः छात्रैः छात्राभिश्च प्रस्तुताः। कार्यक्रमेस्मिन् डॉ. ओमनदीपवर्यः विभागसंयोजकः, डॉ. रविदत्तकौशिकवर्यः जिलासम्पर्कप्रमुखः, डॉ.सुनीलः , डॉ. अङ्किता, डॉ. नैन्सी, डॉ. प्रियङ्का, डॉ. नितिनः, डॉ. बिन्दिया, डॉ. शिल्पा, डॉ. अरविन्द्र, डॉ. निकिता, डॉ. अंशुलसहितं अन्ये गणमान्यसदस्याः च उपस्थिताः आसन्।

# जेएनयू नवदेहिल्ल्याः शैक्षिकं भ्रमणं कृत्वा उत्तराखण्डस्य मानवीयविषयाणां चत्वारिंशत् प्राध्यापकाः प्रत्यागच्छन्

वार्ताप्रेषकः-प्रवेशकुमारशुक्लः

उत्तराखण्डराज्यस्य उच्चशिक्षाविभागेन प्राध्यापकानां गुणवर्धनाय मुख्यमन्त्री उच्चशिक्षा गुणवत्ता उन्नयन एवं ज्ञानवर्धन प्रशिक्षण योजना इत्यस्याः योजनायाः प्रथमचरणे राज्ये स्थितानां विविधमहाविद्यालयानां विश्वविद्यालयानां च चत्वारिंशत् प्राध्यापकाः रायपुर देहरादूनतः प्रेषितम्। उच्चशिक्षामन्त्री उक्तवान् यत् 'उत्तराखण्डस्य समृद्धं प्राकृतिकसंसाधनं यथा अस्ति, तथा उच्चशिक्षापि समृद्धा सशक्ता च भविष्यति।' प्राध्यापकाः जेएनयू विश्वविद्यालयस्य उच्चशिक्षायाः प्रणालीं दृष्ट्वा स्वराज्यस्य आवश्यकतानुसारं नवीनतत्त्वानि उच्चशिक्षायां समावेशयन्तु। उत्तराखण्डस्य त्रयोदशसु जनपदेषु स्थितेषु ११७



महाविद्यालयेभ्यः ४० प्राध्यापकानां चयनं कृतम्। तत्र पौड़ी गढ़वालतः ५, नैनीतालतः ६, पिथौरागढ़तः २, रुद्रप्रयागतः २, बागेश्वरतः २, चमोलीतः ३, उत्तरकाशीतः १, टिहरी गढ़वालतः ४, हरिद्वारतः ४, देहरादूनतः ३, उधमसिंहनगरतः ३, चंपावततः १, अल्मोड़तः ४ इत्येते प्राध्यापकाः चयनिताः। सामाजिकविज्ञानस्य विभिन्नविषयानां प्राध्यापकाः अस्मिन् योजनायां समाविष्टाः। इतिहासः - ६ भूगोलः - ६ अर्थशास्त्रम् - २राजनीतिविज्ञानम् -७ हिन्दी - ५संस्कृतम् - २मनोविज्ञानम् १ शिक्षाशास्त्रम् -२समाजशास्त्रम् - ५ अंग्रेजी - ३ गृहविज्ञानम् - १ डॉ. प्रकाशः लखेड़ा इत्यनेन चत्वारिंशत् प्राध्यापकानां प्रतिनिधित्वं कृत्वा मुख्यमन्त्री, उच्चशिक्षामन्त्री, विभागीयसचिवः, निदेशकः, संयुक्तनिदेशकः, उपनिदेशकः, सहनिदेशकः, समस्तप्राचार्याः च इत्येतेषां प्रति कृतज्ञतां ज्ञापितम् ।

जवाहरलालनेहरुविश्वविद्यालयं (जेएनयू) नवददेहिल्ल्यां शैक्षिकभ्रमणं कृत्वा प्रत्यागताः। डॉ. अञ्जू अग्रवाल, निदेशकः उच्चशिक्षा निदेशालयं हल्द्वानी इत्यत्र शिष्टाचारमेलनं कृतवती। तस्मिन्नेव अवसर उपस्थिताः आसन् डॉ. आर. एस. भाकुनी, डॉ. हरीशसिंह नयाल, डॉ. गोविन्दः पाठकः च। तत्रैव डॉ. प्रकाशः लखेड़ा, नोडल अधिकारी, मुख्यमन्त्री उच्चशिक्षा गुणवत्ता उन्नयन एवं ज्ञानवर्धन प्रशिक्षण योजना इत्यस्य नेतृत्वे डॉ. रोहितकुमारः काण्डपाल, डॉ. हेमलता गोस्वामी, डॉ. आशीषः अंशुः, डॉ. विद्या इत्येते अपि शिष्टाचारमेलनं कृतवन्तः।

मार्चमासस्य चतुर्विंशति दिनाङ्कात् एकोनत्रिंशत् दिनाङ्कपर्यन्तमायोजिते भ्रमणदले उत्तराखण्डराज्यस्य उच्चशिक्षामन्त्रिणः डॉ. धनसिंह रावत इत्यनेन हरितध्वजं प्रदर्श्य राजकीयमहाविद्यालयात्

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**



# संस्कृतं विना संपूर्णविकासः असम्भवः-योगऋषिः स्वामी रामदेवः

हरिद्वारम् । योगऋषिः स्वामीरामदेवः अद्य संस्कृतभाषायाः महत्वं प्रकाशयन् उक्तवान् यत् 'संस्कृतं केवलं भाषा न, अपितु ज्ञानसागरः अस्ति, यस्मिन् सम्पूर्णविश्वस्य भाषाणां सारः निहितः अस्ति।'



तेन उक्तं यत् 'शास्त्रेषु एवं सामर्थ्यमस्ति यत् भारतं समग्रं विश्वं स्वकीयेन वैभवेन प्रकाशितुं शक्नोति।' स्वामीरामदेवः पुनरपि उक्तवान् यत् 'जीवनस्य संपूर्णविकासस्य आधारभूतं संस्कृतं अस्ति, एषः एव मार्गः यस्य अनुगमनेन पतञ्जलिः तत्संबद्धाः च संस्थाः सक्रियरूपेण कार्यं कुर्वन्ति।'

तेन अपि उक्तं यत् 'संस्कृतभाषायां जीवनस्य ब्रह्माण्डस्य च गूढतत्त्वानि निहितानि सन्ति, यासां अध्ययनं अनुसंधानं च आधुनिकयुगे अपि प्रासंगिकं अस्ति।'

स्वामीरामदेवः सभायां स्थितानां सर्वेषां प्रति आह्वानं कृतवान् यत् ष्सर्वे संस्कृतस्य प्रचारप्रसारे योगदानं ददतु, एवं च एतां स्वजीवने समावेशयन्तु, यथा अस्माकं सांस्कृतिकं वैभवं ज्ञानपरम्परा च सुरक्षितं संवर्धितं च भवेत्।'




# 'वर्तमानपत्रकारिता तथा गान्धीविचाराणाम् प्रासङ्गिकता'

दिल्ली-मीडिया-संघटनस्य च दिल्ली-नगरात् प्रकाशितस्य 'हिन्द-प्रहरी' नामक-दैनन्दिन-समाचारपत्रस्य च संयुक्ततत्वाधाने 'वर्तमानपत्रकारिता तथा गान्धीविचाराणाम् प्रासङ्गिकता' इति विषये एकदिवसीय-संगोष्ठी आयोजिता। नवदिल्ल्यां स्थिते गान्धी-शान्ति-प्रतिष्ठानस्य सभागारे आयोजितस्य अस्य संगोष्ठ्याः प्रथमसत्रे मुख्यातिथिः प्रख्यातः गान्धीविद्ः, खादी-ग्रामोद्योग-आयोगस्य पूर्वाध्यक्षः, काँगड़ा-सहकारी-बङ्कस्य अध्यक्षः च श्रीलक्ष्मीदासः आसीत्। विशिष्टातिथयः वरिष्ठपत्रकारः श्री उमेशजोशी तथा 'राष्ट्र-टाइम्स' इत्यस्य सम्पादकः श्री विजयशङ्करचतुर्वेदी च आसन्। कार्यक्रमस्य अध्यक्षता वरिष्ठपत्रकारः भारतीय-जनसञ्चार-संस्थानस्य पूर्वसंकायाध्यक्षः प्रोफेसर-गोविन्दसिंह महोदयेन कृता।

कार्यक्रमस्य आरम्भः दीपप्रज्वलनेन जातः, ततः अतिथीनां स्वागतं दिल्ली-मीडिया-संघटनस्य अध्यक्षेन डॉ. बी.आर.चौहान, महासचिवेन वेदप्रकाशशर्मणा अन्यैः पदाधिकारीभिः च सह कृतम्। अतिथीनां उद्बोधनानन्तरं



अस्मिन् अवसरि डॉ. प्रदीपकुमारकेशरिणा विरचितस्य 'श्रीपादबाबा-स्मृतिग्रन्थस्य' विमोचनम् अपि कृतम्।

भोजनावकाशानन्तरं द्वितीयसत्रे मुख्यातिथिः गुजरातराज्यस्य सूरतनगरात् आगतः गान्धीवादी-चिन्तकः, शिक्षाविदः, प्रमुखः समाजसेवी च, 'शिबा कानूभाई ट्रस्ट्, सूरतस्य' व्यवस्थापकीयसमितेः श्रीपरिमलदेसाई आसीत्। अध्यक्षतां वरिष्ठपत्रकारः डॉ. अरविन्दमोहनः कृतवान्। अस्य सत्रस्य मुख्यवक्ता 'निस-विश्वविद्यालयस्य लेखक-पत्रकारः प्रो. डी.के.गिरि आसीत्। अस्मिन् अवसरे वरिष्ठपत्रकारः 'इण्टरनेशनल-पीस-मिशन'



इत्यस्य अध्यक्षः डॉ. रमेशकुमारपासी, महेशचन्द्रः, श्री एस. के. शर्मा, 'प्रज्ञा-मेल' इत्यस्य सम्पादकः श्री अरुणबर्मन, सरदारजगमोहन इत्यादयः वक्तारः अपि स्वीयान् विचारान् व्यक्तवन्तः।



अस्मिन् अवसरे 'शहीदभगतसिंह-टाइम्स' इत्यस्य सम्पादकः शिवकुमारअग्रवाल, पीटीआई-समाचारसंस्थायाः पूर्वसम्पादकः श्री अजबसिंह, वरिष्ठपत्रकारः जनार्दनमिश्रः, 'संस्कृतसंवादस्य' सम्पादिका श्रीमती मञ्जुशर्मा, 'मेट्रो-रिपोर्टर' इत्यस्य सम्पादकः श्री जे.के.मिश्रः, 'देश-की-आवाज' इत्यस्य सम्पादकः श्री के.के.सिन्हा, वरिष्ठपत्रकारः योगेशभट्ट, महेशमिश्रः, च तथा राष्ट्रियराजधानीक्षेत्र-दिल्ल्याः अनेके पत्रकाराः उपस्थिताः आसन्। कार्यक्रमस्य अन्ते संघटनस्य अध्यक्षः डॉ. बी आर चौहानः समस्तेभ्यः अतिथिभ्यः, उपस्थितपत्रकारेभ्यो, गणमान्य-जनेभ्यश्च धन्यवादं ज्ञापितवान्। संगोष्ठ्याः उभयोः सत्रयोः सञ्चालनं 'हिन्द-प्रहरी' इत्यस्य सम्पादकः तथा संघटनस्य महासचिवः वेदप्रकाशशर्मणा कृतम्।



अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
Owner. Printer, Publisher and Editor MANJU SHARMA, Printed by Lakshy Printers, 521/8B, Ground Floor, Gali No. 14, Adharsh, Mohalla, Maujpur, Delhi-110053
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2024-26 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।